शास्तेषां ज्याकोटिः स्यात् ॥ उदाहरणं
अभिवेष्टीभिः ४।१३ कालेनेष्टानन्तरं
कालिको मध्याह्नसूर्यः १।५।५७।२४
सायनः २।१३९।११ अस्मात् भुजज्या १७
४४।२१ इष्टपरमापक्रमज्या १३९७ गुणि
ता ३८।१९।४४४४।४० त्रिज्यया ३४३८
भक्ते लब्धं क्रान्तिज्या ११०।३९ यो धनुः ध्रु
नाताः क्रान्तिकलाः ११।३१ अत्र षष्ट्या भक्ते।

ग्रेणाग्राक्रांतिहृतनताः १८।५१।२१ अनयो
र्भिन्नदिक्त्वादन्तरेण जातानेनोद्धृताः दक्षिणा :
ग्रा ४४।५८ पलज्या ४।४।४१ अनेनोद्धृ :
ता ४४।५८ नवतिशुद्धाः शेषंकोटि।
ज्याघ्नाः इत्यनेननेनोद्धृताः शेषापलोज्या।
कोटिज्या ३४।३।२४ ॥ २४ ॥ अ
थछायाकर्णयोरानयनमाह ॥ प्रोक्त
मानांगुलाभ्यस्तिभुजत्रिज्येयथाक्रमम् ।
कोटिज्ययाविभज्यामेछायाकर्णौवहर्दले ॥
भुजत्रिज्येननोशज्यात्रिज्यावशोक्तमानांगु
लैः शंकोश्मानांगुलान्निनेरभ्यस्तेगुणिते
कार्ये उभयत्रकोटिज्ययाभक्तेलब्धेयथाक्र
मेमध्याह्नछायानत्कर्णौभवतः ॥ उदा
हरणं ॥ भुजज्या ४०।४।१० त्रिज्याव।
३४।१८ उभयत्रापिप्रोक्तमानांगुलैः पभिः
१२ गुणितेभुजज्या ४८५।१० त्रिज्याच ४
१२५८ कोटिज्ययानया ३४।१३।२४ भक्ते
लब्धमेवात्रमध्याह्नछायांगुलात्मका ११२
५ अपरत्रमध्याह्नकर्णांगुलादि १२।५
॥ १५ ॥ अथमध्याह्नछायातोनतानय
नेश्लोकाभ्यामाह ॥ मध्यछायाभुजस्ते
नगुणिनाभिमभोर्विका स्वकर्णमाधनुलि
प्तानतांशादक्षिणाभुजे ॥ उनगेष्ठानुया
याम्याः नाः सूर्यक्रांतिलिप्तिकाः दिगैदे

सूसि
३.
८४

64

मिश्रिता: सौम्येविक्षिप्ता: स्वाक्षलिप्तिका: ॥
इष्टदिनेमध्यच्छायायामध्याह्निकीच्छायायाभुज
सैवाज्ञेया तेनभुजेनत्रिभमौर्विकात्रिज्या
गुणितास्वकर्णेनस्वमध्याह्नच्छायाकर्णेन
भक्ता: फलमक्षसाधनलिप्तानांतत्संज्ञकाद्दक्षि
णेभुजेनतत्कला: नानतत्कलिप्तादक्षिण
दिक्स्यसंतिउत्तरा: स्यु: उत्तरेभुजेयाम्याद
दक्षिणास्तानेनकला: प्राग्युक्ता: सूर्यक्रा।
न्तिलिप्तादिभेदेनमिश्रिता: संयुक्ता: सौम्य
दिशोसौम्येनेरितास्वाक्षलिप्ताभवंति ॥ उ
दाहरणे ॥ मध्यमच्छाया १।४५।अ
यमेवभुजउत्तर: १।४५। अनेनत्रिभज्या
३४३८ गुणिता ४८७० मध्याह्नकर्णेन १
४।०।५। भक्ता ४०।३।०।५। अस्य
धनुर्लिप्ता ४०।३।५१। अयोनरेभुजेतेन
दक्षिणाइमाधनुर्लिप्ता ४०३।५। सूर्यक्रा
न्तिलिप्तिकाउत्तरा: २१।०।३। उभयोर्भि
न्नदिक्त्वात्योगेजातास्वाक्षलिप्ताका: १५
३४।५४ ॥१५॥ अथास्तज्यालम्बा
नयनमाह ॥ नाभ्यक्षोज्यावनद्वंग्रोह्य
त्रिज्याहृते: पदम लम्बज्यार्कगुणाक्षज्या।
विषुवद्भाप्तलम्बया ॥ नाभ्याक्षकला
भ्य: ज्याजीवासाध्यासाक्षज्याभवति त
द्वर्गमक्षज्यावर्गं त्रिज्याहृते: त्रिज्यावर्गा।

शेषत्यक्तात्शेषान्मूलेलम्बज्यान्त्यार्केगुण
लम्बयालम्बज्ययाभक्तेलब्धेविषुवच्छायलभा ॥
उदाहरणे ॥ अन्तलिप्तिकाः १५ । २४ ।
५४ । आसेज्यानाभोन्त्या १४ । ८२ । ३४ ।
अस्यावर्गः २२००९३२ । ५५ अर्कवर्गोन्ति
ज्यावर्गादस्मात् १८ । २४ । ८ । ४४ शोधि
तेशेषे ५९ । ४६ । २० । १९ अस्मूलेनानेलम्ब
ज्या २१०२ । २४ अन्त्यज्या १४ । ८२ । २७ ।
अर्के १२ गुणा १७८०१ । २४ लम्बज्यया ।
नया २१०२ । २४ । भक्तेलब्धेविषुवत्प्रभा
५ । ४५ । विलोमविधौक्रियमाणेकि
१९ ॥ अथनतभागेभ्यः अन्तराननेनका
न्तिच्छायासूर्यसाधनेसार्धश्लोकोभ्यासाह ॥
स्वाल्पार्केनतभागानोदिकसौम्येनरमनयथा
दिमेदेपक्रमःशेषस्तस्यज्याविन्ययाहना ॥
परमापक्रमज्याभावाप्तंमेषादिगोरविः मृगा
दौशोध्यभगणान्मध्याह्नेकमुटोभवेदिति ॥
स्वान्तःखिदेशायाहोषाः अर्केनतभागानो
मध्याह्नसूर्येनतांशयोर्भागानोदिकेसौम्यापव.
दिक्षेनान्तं अन्यथान्यदिक्षेतुयथायोगः का
र्यः शेषोकः अपक्रमः क्रान्तिःस्यात् न
स्यक्रान्तेज्याकार्यात्रिज्ययागुणापरमक्रान्ति
ज्ययाभक्ता लम्बस्यचापंधनुरंशादिके समे ।
षादिगोरविः मेषादिराशित्रिनयाज्जगेनो

सूसि
उ॰
८५

65

र्कः स्यात् कर्कादौ कर्कादित्रिनये केंवक्रा
धीन षड्राशिशुद्धः स्फुटः मध्याह्नकाले स्फु।
टार्कः स्यात् । तुलादौ तुलादित्रिनये भार्ध
संयुतराशिषट्कयुतादागतार्कात्स्फुटोर्को।
ज्ञेयः । मृगादौ मकरादित्रिनये केभगणा
त द्वादशराशिभ्यः शोधितचक्रशेषमयनो
शसंस्कृतमध्याह्नकाले स्फुटार्कः स्यात् ॥
पूर्वानीतनतानार्थेन्यस्तायनांशसंस्कृतगत्य
र्थं सिद्धमुदाहरणं ॥ स्वदेशेयोग्राक्षो।
ग्रादक्षिणः २५।२४।१०।२१ अर्केन
तभागः ९।४४।५८ दक्षिणाअनयोर्दि
गैक्यहद्धादेनेरेजाताक्रांतिः १८।५।११२
अर्केननतभागा अस्यज्या ११७३५ त्रिज्य
या ३४३८४।४५।४।४२ परमापक्रम।
यानया १३९७ भक्तेलब्धं १७३३।१७ अस्य
धनुः ३१५९।४ षष्टिभक्तेरेणादि ५२३
९।४। विकलाभक्तेलब्धेमेषादिकोः सा
यनोरविः ११।१११२१९।४। अयनांशा १६।
४।१४३। रहितानोमध्यमाह्निकः सायो
रविः ११।५।५७।१७।१७ ॥ अथम।
ध्यमार्कानयनेल्पाकार्थेनाह ॥ तन्मोदम
सकृद्धामेवार्थमध्यादिवाकरः ॥ तस्मा
दानीतमसकृत्सूर्यान्मान्दमेदफलमसकृद्धार
वामेनविपरीतेनसाकृत्सूर्यमेसकार्यमध्यम

सूर्यः स्फुटः ॥ उदाहरणम् ॥ यथा
माध्यिकः सूर्यः १।५।५७।१७। मंदो।
च्चं २।१७।१९।५५ एतेनोनेमंदकेन्द्रं।
१।११।११।३८। अस्य भुजज्या २२७।०२
२। अयमोजपदगतोनेरगुणान्येन ०।२०।५
णिता ७५।१९।४७ त्रिज्याभक्तेलब्धं ०
१२। इदं युग्मपरिधौ १४ ऊनेनोनःस्फुट
परिधिः १२।४७। अनेन भुजज्या २२७०
२२ गुणिता २।२९।३१।१२ भगणांशैः
भक्ते लब्धं ८९।५५। अस्य धनुः जातं मं
दफलं कलात्मकं ८९।५५। केन्द्रस्य
मेषादिकत्वाद्धने विलोमं जातं मृणात्मकं
भक्तेजातमेकाद्यं ।।२९।५५ अनेन
संस्कृतः स्पष्टो रविः १।०।५।५७।१७
जातो मध्यमो रविः १।४।३०।२२ अस्मा।
न्मुनर्मंदफलमानीय सकृत्सकृत्प्रकारेण
पूर्वानीतरवौ १।०।५।५७।१७ मेथे
यावत् स्थिरो भवेदिति त्रिलातलेंदुमस्य
ड्रमित्यादि सर्वेषु ग्रहेषु तत्सर्वे विलोमविधि
नाप्रदर्शितं ॥ १८ ॥ अथाग्रकर्णा।
नयनमाह ॥ कोटिज्याविष्कम्भकर्णाग्र
णमाशांकुजीवयो अर्काग्रोविष्कम्भकर्णा।
ग्रीमध्यकर्णोधृतास्वका ॥ कोटिज्या
सूर्यकोटिज्याविष्कम्भकर्णाग्रगुणतत्कोटिं

स्मृति
उ.
९९

66

गुणाशंकुजीवयाशंकुजीवानामोन्नतांशा
नयामाभक्ताफलेऽर्काग्रासूर्यस्याग्रा इयं।
मिष्टकर्णश्चौक्षाभमनवालिकच्छायाघ्नेन
गुणितानामध्यकर्णार्धेनामध्यकर्णेनभक्ताः
फलमिष्टकालिकाकर्णाग्रास्यात् ॥ उ
दाहरणं ॥ रविःक्रांतिज्या १११०।०।१३
नेऽत्रविषुवत्कर्णेन २।१५ गुणिता १४७
५०।१५ उन्नतांशजीवया २४।२।२४।
भक्तेलब्धमर्काग्रा ४।१५ इयंइष्टच्छाया
कर्णेनानेन १५।२७। गुणिता ६७।
२४ मध्यमकर्णेन १२।१० भक्तेलब्धंस्वा
काग्रेष्टकालिकायाः ५।२४ इयमे
वकार्येयंनान्योऽवधाने ॥ १५ ॥ अथभु
जानयनेश्लोकाभ्यामाह ॥ विषुवद्भा
गुणार्काग्रायामेस्याऽडनरोभुजः विषुव
त्यांविशोध्योदक्गोलेस्याद्धाग्रुशातनरः॥
विपर्ययान्भुजोयाम्योभवेत्प्राच्यपरांतरे।
मध्याह्निकोभुजोनित्यंछायामध्याह्निकी
स्मृता ॥ अर्काग्रायास्वदक्षिणगोले
विषुवत्प्रभानयायुक्ताः उत्तरादिकोभुजः।
स्यात् उत्तरगोलेविषुवत्यापलभयाम।
काग्राविशोध्याशेषमुत्तरादिकोभुजः।
स्यात् यदिविषुवत्यापलभायाअर्काग्रा
न्यूनाइति तदार्काग्रायांविषुवतींविशो

धनेऽर्वेयाम्योदग्वृत्तेभुजः स्यात । कस्मा
दित्यत आह । प्राच्यापरेतेतिश्रुवोपगास्
यादनगालेप्रदेशेयाम्योत्तरेवाभुजः स्यात ।
मध्याह्निकोमध्याह्नकालिकोभुजः नित्यं
सदामध्याह्निकीमध्याह्नकालिकीछायया
स्मृता कथिता ॥ उदाहरणं ॥ अर्कोग्रा
४।१९ पलभाता ५।४५ उत्तरगोलत्वा
द्वहिताजातउत्तरभुजः १८ मध्याह्नछा
यामध्यभुजइत्याख्याते ॥ २० ॥ अथप्रका
रद्वयेनकर्णानयने ॥ लम्बाद्दजीवे ।
विषुवच्छायाद्वादशसंगुणे क्रान्तिज्याप्ते
नुनौकर्णौसममण्डलगौरवाविति ॥ ल
म्बज्याद्दज्याक्रमेणविषुवच्छायाद्वादश
भोगुणितेउभयत्रक्रान्तिज्ययाभक्तेसम
मण्डलगेसवितः स्वसूर्यकर्णोभवतः उ
भयत्रछायाकर्णः स्यात ॥ उदाहरणं
२०।५८।४ पलभया ५।४५ गुणिता
१८७।८।१२।५२। क्रान्तिज्यया ११९०।१२
९ भक्तेलब्धकर्णः १९।१२ अथाद्दज्या
१५८४।२५ द्वादशगुणिता १७८१२।४
८ क्रान्तिज्यया ११९०।१९ भक्तेलब्धक
र्णः १९।१२ ॥ २१ ॥ अथप्रकारान्तरे
णकर्णानयनेमाह ॥ सौम्याद्योनायदा
क्रान्तिः स्यात्तदाद्युदलश्रवः विषुवच्छाय

सू.सि. उ. ५७

67

याभक्तः कर्णो मध्याग्रयोऽन्तरः ॥ यद्वासौ
ष्योन्नतांशकोटिः अहोना अहोशाहृना पा
न्नद्वाद्युदलश्रव: मध्याक्रकर्णो विद्युवच्छा
यायाभक्ताशत्यो मध्याग्रयामध्याकृग्रयोऽन्त
नोभक्तः फलैकर्णः स्यात ॥ उदाहरणं
९।५।१३। अहोशान २५।५।।।
अक्षेनिकारणान्मध्याक्रकर्णः २।०।५
पलभयाग्रणिना ३४।२८ अर्काग्राया ४
१४५ भक्तः फलैकर्णः २५०।०५ ॥
२५ ॥ पुनरग्रासाधनमाह ॥ स्वकोटि
ज्याविनीवाचीलम्बज्याप्ताग्रमौविंकी स्व
स्वकर्णहृनाभक्ताविज्यायाग्रोगुलादिका ॥
स्वकोटिज्यास्वाभिमनास्वकीयस्वहृकर्णो
हृना मध्याक्रकर्णेनगुणिताविज्ययाभक्ता
लब्धमंगुलादिग्राभवेत ॥ उदाहरणं।
कोटिज्या ११०।३४ त्रिज्यया ३४२८।
गुणिना २८१८४१४१४१ लम्बज्यया ३०
४८।४ भक्तेलब्धमग्रिज्या ११३५।४ इयं
मध्याक्रकर्णेनानेन १२।५ गुणिना १४८
४३।४२ त्रिज्यया ३४३८ भक्तेलब्धेनदेवा
ग्रिज्या ४।१४ ॥ २३ ॥ अथकलाया
पकरणीसाधनार्थकोणशंकृहकज्योस्त्रि
वृ.पंचकेनाह ॥ त्रिज्यावर्गार्धतोग्रज्या
वर्गोनानद्वादशाहृनान पुनः द्वादशानि।

ग्रास्तुलभाजेयत्फलेवुधैः प्रोक्तवर्गार्धयुक्ते
नेविषुवत्वर्गभाजितात् लब्धेनकर्णेना
मनोपृथक्स्थापयेद्बुधः ॥ अर्कज्याविषु
वच्छायाग्रजियागुणितात्तथा भक्तात्फला
प्तेनहृग्संयुक्तेकर्णेपदं ॥ फलेनसंयु
क्तेदक्षिणोत्तरगोलयोः याम्ययोर्विदिशोः
प्रोक्तरेवंयाम्योत्तरे रवौ ॥ परिभ्रमतिप्रोक्तो
स्तः प्रोक्तोफलत्तरगोलयोः तत्रिज्यावेगवि
श्लेषात्स्फुलेहृवज्याभिधीयते ॥ त्रिज्याव
र्गार्धाद्ग्रज्यावर्गेनहीनात् द्वादशगुणि
तात् तत्पुनः द्वितीयवारं द्वादशगुणात् ।
प्रोक्तो द्वादशाङ्गुलात्मकस्य वर्गार्धेन युक्तेन
पलभावर्गेन भाजितात् बुधैर्गणितविद्भिः
यल्लब्धं प्राप्तं तेन करणी नाम तस्य करणीतो
करणीबुधोगणः पृथक् द्वितीयस्थाने स्था
पयेत् ततोर्कज्या द्वादशगुणिता विषुव
च्छायापलभयाग्रज्यया गुणितात् तथास्
वेवत् प्रोक्तवर्गार्धयुतेन पलभावर्गेण भ ।
क्तात्फलं सत्तेन हृग्मस्य फलस्य वर्गेन संयुक्ता
कैः सूर्ये परिभ्रमति सति ब्रामेण याम्ययोर्वि ।
[illegible]शोः दक्षिणोत्तरयोर्विदिशोः आग्नेयनैरृ ।
त्ययोः [illegible]शानवायव्योरित्यर्थः । तेनाद
नशवीर्थे आग्नेय पश्चात्योर्दक्षिणोत्तरके
मध्ये दिनपार्धेन [illegible]मा वायव्ययोर्दक्षिणोत्

सूसि
उ.
५८

68

त्क्रमेणफलिनार्थः सकोणसंज्ञकः शंकुः
स्यात् नकोणशंकुत्रिज्ययोर्वर्गांतरान्मू
लेदृक्ज्योच्यते ॥ उदाहरणं ॥ त्रिज्या
३४३८ अस्यावर्गः ११८१९८४४ अर्धं ५
९०९९२२ अग्रज्या १२२१।३० वर्गेण।
१४९१९०५८।१५ रहिते ४४१०८४७।४
४५ द्वादशगुणिते ५२९४९०३८९।०।
पुनर्द्वादशगुणे ७३२२९४४९८८।० इदं
शंकुः १२ वर्गार्धयुक्ते १४४७२ युक्ते पल
भया ५।४५। वर्गेण ३३।३ वर्गेण १०
५।०।३। भक्ते लब्धं ज्याकरणी ६९१०८
९२।२९ इदं द्वितीयस्थाने स्थापितं ६९०१
०८९२।२४ द्वादशगुणितेन १२ पलभा
६९० इयं त्रिज्यया १२२१।३० गुणिता
८५७४५।३० शंकुवर्गार्धयुक्ता पलभा
वर्गेण १०५।३ भक्ता लब्धं मूलाख्यं ८०९
३२ अस्यावर्गेण ६५५२४४।१३ शून्य
ज्याकरण्या ६९०१८८९२।२४ युतः
६९६७४२३६।४९ अस्यामूले २५८३।
२६ पूर्वानीतफलेन ८०९।३२ युते उ
त्तरगोले लब्धाज्ञाने कोणशंकुः ३३९२।५
२। अस्यावर्गः ११५१२२२२।४८ त्रिज्या
वर्गः ११८१९८४४ अनयोरंतरं ३०
७६२२।४२ अस्यामूले दृक्ज्या ५५४१

१८ ॥ १८ ॥ अथेष्टच्छायायाश्छायाकर्ण
योरानयनमाह ॥ स्वशंकुनाविभज्याभि
हता त्रिज्येष्टा द्वादशाहते छायाकर्णौ स्तःको
णेषु यथास्वं देशकालयोः ॥ इष्टकोण।
इष्टकज्या त्रिज्ये द्वादशगुणे स्वशंकुना कोण
शंकुना विभक्ता भे लब्धे क्रमेण इष्टकज्या त्रिज्या
छायाच्छायाकर्णौ स्तः एवं कोणेषु स्वदे
शकालयोर्यथास्वं यथा देशे यथा काले छा
याच्छायाकर्णौ साध्यौ ॥ उदाहरणं ॥
इष्टकज्या ४५४ । ३८ द्वादशभिर्गुणिता ५
४५५ । ३६ कोणशंकुना ३३४२ । ५८ भ
क्ता लब्धं कोणच्छायाकर्णः १ । ५८ । त्रि
ज्या ३४३८ द्वादशगुणा ४१२५६ कोण
शंकुना ३३४२ । ५८ भक्ता लब्धं कोणक
र्णः १२ । १९ ॥ १९ ॥ अथेष्टनाडीच्छा
याकर्णसाधने सार्धश्लोकाभ्यामाह ॥ त्रि
ज्योदक्चरज्याघ्नाक्षयाम्यायोनाद्विवर्जिता अ
न्त्यान्तेनोन्नमज्योना स्वाहोरात्रार्धसंगुणाः
त्रिज्याभक्ता भवेच्छेदो लम्बज्याघ्नोऽथ भाजिता
त्रिज्यया स भवेत् शंकुस्तद्वर्गं परिशोधयेत् ।
त्रिज्यावर्गात्पदं दृक्ज्या छायाकर्णौ तु पूर्ववत्
न ॥ उदग्गोले चरज्या चरान्त्यज्या
ज्या यावरज्या इति मे सा युक्ता त्रिज्या अन्त्या ।
स्यात् याम्यायां दक्षिणगोलेन यावरज्या

सू.सि.
उ.
८९

69

याविवर्निजाहःद्विनार्धत्रिज्यास्याने नतोत्क
मज्यौना सूर्योदयास्तदिनगतनाडीभिः शे
षघटीभिर्वा विरहितेदिनार्धेननकालघटा
तमवशाम्यापाभिलिप्तात्मनयमेरित्यादि।
नतोत्क्रमज्यामाध्यानयाहीनोन्यथः साहो
रात्रार्धमेगुणात्रिज्ययाभक्तापलेछेदसंज्ञः
स्यान् सच्छेदोलम्बज्ययागुणितः त्रिज्यया
भाज्यः लब्धमिष्टकालेशंकुर्भवेत् तद्वर्गेन
स्पर्शाकोर्वर्गेत्रिज्यावर्गोच्छेदयेत् शेषस्याप
देमूलेद्दृग्ज्यास्यात् पूर्ववत् शंकोर्गान्तर
च्छायाकर्णौभवतः ॥ उदाहरणं ॥ सू
र्योदयादिष्टघटीभिः २० नाडिकाः सूर्यः
११।५०।५१।१५ अयनांशाः १९।४२
४७। भुक्तिः ११।२२।२१।५२। अस्यक्रां
तिज्या ११०९।१० क्रांतिकलाः १२२९।२
९ अस्यापक्रमेणज्या १८२।३२ अनेन
हीनात्रिज्यानानमहोरात्रव्यासदलं ३२५४
२७ क्रांतिज्या ११०९।१० पलभया ५।४
५। गुणिता ५१२७।४२ द्वादशभक्तेलं
ब्धः कुज्या ४२७।१८ इयंत्रिज्यया ३४३८
गुणिता १८२७१८२।४ अहोरात्रव्यासार्धे
केतन ३२५४।२७ भक्तेलब्धंचरज्या ५६१
२७ एषांधनुर्नाडिकाद्यं चरकालमः ५६१।४
८ अहोरात्रव्यासमानो २२९४८।२८ तत्र

यौगुणाः ५४२२।७ विकलनक्रान्तिलाङ्गुषा
गुणेज्ञानेदिनार्धे ५९७९।५ अनेन ३९०
भक्तेज्ञानेदिनार्धे १८।३९ त्रिज्या ३४३८।
क्रान्तिकलनलाग्नजाया ५८१।१७ गुणाज्ञा
नाग्रेज्या ३९९९।१७ दिनार्धे १८।३९ सू
र्योदयादिष्टघटीभिः १० रहितेज्यानेनन
दिकात्मके ८।३८ पतनषड्गुणेनेज्ञाना
नतासवः ३३७८ अस्यातनात्रमज्या ७९०।
४ अनयोन्त्या ३९९९।९ रहिता ३२०९।
२३। इयंमहाशायार्धेन ३२५४।२७ गुणि
ना १०४४४७७७३५ त्रिज्यया ३४३४
भक्तालब्धच्छेदः ३०३८।२ अयंलम्बज्या
या ३०९८।४ गुणिताः ९४२२०३७।४
८ त्रिज्यया ३४३८ भक्तालब्धमिष्टशंकुः
२७३७।३८ अस्यवर्गः ७४९४८३८।२
८ अनेनत्रिज्यावर्गः ११८१९८४४ ऊनः
४३२५०७४४ अस्यमूलेज्ञानादृक्ज्या।
२०७९।४२। इयंद्वादशगुणाः २४९
५८।२५ इष्टशंकुना २७३७।३८ भक्ता
लब्धाइष्टच्छाया ९।८ त्रिज्या ३४३८ द्वाद
शगुणाः ४१२५८ इष्टशंकुना २१३७।
३८ भक्तालब्धमिष्टकर्णः १५।४० ॥
अथश्रीमत्कश्मीरछायाकर्णाभ्यांनतका
लसाधनमाधनमाह ॥ अभीष्टच्छाया

सू.सि
उ.
७०

याभक्ता त्रिज्या तत्कर्णभाजिता दृक्ज्या त
द्वर्गोनात्त्रिज्यावर्गाद्यत्पदम् ३७ शंकु
स्त्रिभजीवाघ्नः स्वलम्बज्याविभाजितः छे
दः स त्रिज्यया भक्तः स्वाहोरात्रार्धभाजितः ३८
उन्नतज्या तया हीनो स्वान्त्याशेषस्य कार्मुकं
उन्नतज्याभिरेवं स्युः प्राक्पश्चार्धनतासवः ॥ ३९
त्रिज्याभीष्टच्छाययाभ्यस्ताः गुणितानतकर्णे
नेष्टच्छायाकर्णेन भक्ता फले दृक्ज्या त्रिज्या
वर्गात् दृक्ज्यायावर्गोनाद्यत्पदं मूले इष्ट
शंकुः त्रिज्यया गुणितः स्वदेशलम्बयाभा
जितो भक्तो लब्धं छेदः स छेदः त्रिज्यया ।
गुणितः स्वाहोरात्रेण भक्तः उन्नतकाल
स्य ज्यास्यात् तयोन्नतज्यया स्वान्त्याशेष ।
स्य कार्मुकमुन्नतमज्याभिधस्तुः कार्येन तत्का
लासवो भवन्ति इष्टच्छाया पूर्वाह्णे चेत्प्राग
नेन नासवः अपराह्णे चेदिष्टच्छायायां नतप
श्चार्धनतासवः स्युः ॥ उदाहरणं ॥
त्रिज्या ३४३८ इष्टच्छायया ९।४ गु
णिता ३१२८५।४८ इष्टकर्णेन १५
४। भक्ता लब्धं दृक्ज्या २०२९।२१ अ
स्या वर्गः ४३११७८३।१२ अनेन त्रिज्यावा
र्गः ११८१९८४४ रहितः ७५०८९०
५८ अस्य मूलं शंकुः २७४०।५ अ
नेन त्रिज्यया ३४३८ गुणितः ९४२०८९।

३० लम्बज्यया ३०५८।४ भक्ते लब्धेष्टे
दः ३५४०।५ अर्केत्रिज्यया ३४३८
गुणिता: १०४५।८३५ स्वाहोरात्रेण ३२
५४।१७ भक्ते लब्धमन्त्यज्या ३३।।।३३
अनेयास्वान्त्या ३५।५५।१७ हीनाशेषं ७
८७।५४ अस्योत्क्रमज्याभि: स्वनेधनु: ।
ज्ञातानतासवः १३७५ ३८ एनेष्टनत्र
ष्ठाधिकेन ३८० भक्ते लब्धैर्वेनने ५
३८ इष्टशीर्षेणसहन्नत्वे इष्टदिनार्धे १५
३८ युतोऽधिनेजाता इष्टनाड्य: १० ॥ ॥
अथेष्टकालिकाग्रयाक्रांतिज्ययाक्षांशसूर्य
साधने सार्धश्लोकेनाह ॥ इष्टच्छायानल
म्बज्यास्वकर्णांगुलिभाजिता क्रांतिज्यासा
त्रिजीवाग्राप्रमाप्रक्रमोऽङ्गना ॥ नष्टापे
भादिकेन्दे त्रेपदेस्तत्रभवोरविरिति ॥ ॥
स्वदेशीययालम्बज्यया इष्टकालिकाग्र
यागुणिता स्वकर्णांगुलविभाजिता तात्का
लिकाच्छायायाः कर्णांगुलसंख्याभिर्भं ।
कालजाक्रांतिज्यासाक्रांतिज्यात्रिजीवा ।
घ्नी त्रिज्यया गुणिता नयापरमक्रांतिज्यया
भाज्या लब्धा सा वा एवं धनुर्भादिके राश्यादिक
केन्द्रे स्मानेराश्यित्रयात्मके पदे: वत्रभस्त ।
त्रपदेभव उत्पन्नस्तज्जातीन्याम् सूर्ये: स्यात ॥
उदाहरणं ॥ क्रांतिज्या १८।४५।२

सूसि
उ.
७१

71

१० अक्षांशा दक्षिणा २५।२९।। अनयोरं
तरेणजातनतांशाः दक्षिणाः ९।४९।३५
उन्नतांशाः ८३।१३।३९। एषांजीवा २
४।१३।१४ क्रान्तिज्या ११०५।१० विषुव
त्कर्णेन १३।१५ गुणिता १४०७० २४३
न्नतांशजीवायाः २४।१३।१४ भक्तालब्धा
ध्रुवकाग्रा ४।१५।३५ इष्टच्छायाकर्णेन
१५।४।११ गुणिता ६५।११।५। म
ध्याकर्णेन १२।५।१३ भक्तालब्धमिष्टाग्रा
५।२३।४३ लम्बज्या ३०५८।४ अग्रयं
५।१३।४३ गुणिता ३८।३२।१५।०१
परमापक्रमज्यया १३९७ भक्तालब्धं २७
२९।३८।५१ अस्याधनुःकलाद्यं ३१५२
४८ षड्भाभक्तेंऽशादि ५१।३२।४८ त्रि
शताभक्तेलब्धेराश्यादिमेषादिकःसायन
रविः १।२२।३२।४८ अयनांशैः ९।
४१।४७ रहितेजातःतात्कालिकोर
विः ११।५।५९।११ वियोगविधेरेका
मावयवः वेनपूर्वेनदोनरेपनतितुल्य
मेवसमायाति ॥ ॥ अथभाभ्रमण
माह ॥ इष्टेकिमध्येप्राक्पश्चाद्दिनेबा
हुद्वयांतेरं मत्स्यद्वयांतरयुतेत्रिस्पृक्।
सूत्रेणभाभ्रमइति ॥ ४। ॥ इष्टेऽङ्कि
र्तेभ्रमेत्रेदिवसमध्ये मध्याह्नेशिलाने

लम्बकेशुङ्कमिन्याद्दिनाहृन्नेलिखेत् तत्र।
प्राक्कस्थात्पूर्वविभागेपश्चिमविभागेरेखा
कार्या तन्मध्येशङ्कुःस्थाप्यः ततोबा।
ह्मचयोनेरपूर्वापरसूत्रान्तभुजत्रयोनेरनिर्ग
मः मध्यप्रवेशः ततनभुजत्रयोनेरेस्थाने
पतेसति इतिमत्स्याद्वयोनेरेपुनः सलम्ब।
विष्कम्भोग्रन्थेवंमत्स्यद्वयमुत्पाद्यतस्य।
प्रत्येकंमुखपुच्छगतमध्यसूत्रयोः समार्गे
णसम्पातेनयोगेयस्मिन्स्थानेतस्मात्त्रिस्पृ
क्सूत्रेणविष्कम्भयमलग्नहूनसूत्रमितेन
भाभ्रमः छायामार्गमण्डलेभवति पूर्वक
पालेस्थितसमयेहृत्तमध्यगतशेषच्छाया।
ग्रेहृतपश्चिमविक्षेलगाति ततःछायाग्र
स्वमार्गेणचलितेमध्याह्नेहृतमध्यविक्षेल
गाति ततः स्वमार्गेणचलितच्छायाग्रेप।
श्चिमकपालेस्थितसमयेहृतपूर्वविक्षेलग
तीतिच्छायाभ्रमणेस्वहृतमार्गेणैवस्थीहृ।
तमितिभावः ॥ ॥ लङ्कोदयास्वसा
धनेश्लोकाभ्यामाह ॥ त्रिभद्युकर्णार्ध
गुणाः स्वाहोरात्रार्धभाजिताः क्रमादेक
द्वित्रिभाज्यास्तच्चापानिपृथक्पृथक् ५२
स्वाधोधः परिशोध्याथमेषाद्लङ्कोदयास
वः तेमाद्ययोर्थगोगेकः प्रारम्भेकहिमा
प्रावन्ति ५३ ॥ एकद्वित्रिभाज्या ए

स्प्रसि
३०
७१

72

कराशिज्याद्विराशिज्यात्रिराशिज्याः क्र
मात् त्रिभज्याकर्णार्धगुणाः त्रिराशिगु
ज्याग्रगुणाः स्वाहोरात्रार्धभाजिताः स्वा
क्रान्तिज्यासंवेष्टद्युभिभाज्यः तस्याया
निफलानिधनूंषि पृथक्पृथक् त्रिस्थानेषु
ष्यानि तदन्तेष्वाद्योधः स्वाद्योधः एक
त्र्याफलेयथास्थिते ततः प्रथमे द्वितीये
तृतीये तृतीयाद्गृहीत्वान्यमेषान्मेषमास्य
राशित्रयाणां लेकोदयासवो भवन्ति नि
यतत्वात्मानेष्ववत्रिंशदधिकेमेकोनविं
शतिशतमित्यर्थः ॥ ॥ उदाहरणं ॥
मेषादिराशित्रयाणांमेनेलेकोदयः १५७
० । १७५५ । १९३५ ॥ अथैषामुत्प
त्रिप्रकारः । एकराशिज्या १७१५५ पर
मक्रान्तिज्यया १३५७ गुणिता २४१४४
४३ त्रिज्ययाभक्तेलब्धमेकराशिक्रान्तिज्या
८९३ । ३० अस्याधनुर्जाताक्रान्तिः ७०२
अस्याउन्नमज्या ७११ । २४ अनयात्रिज्या
३४३८ रहिताजातानेमेकराश्याद्दिनव्या
सदले ३३८५ । ३४ अनेनैवनाम्नातः स्वा
होरात्रार्धंराशिन्योराशित्रयस्यज्या २५
७८ परमाक्रान्तिज्यया १३५७ गुणिता
४१८०१५८ त्रिज्यया ३४३८ भक्तालब्ध
ब्धंराशिद्वयस्यक्रान्तिज्या १२१० । ५ अस्य

धनुर्नानाक्रान्तिज्या १६०।२४ अस्या उ
न्नमज्या २२२ अनयास्त्रिज्या ३४३८ रहि
ता जाता राशित्रयस्य दिनव्यासदले ११
१९।२५ एभिस्त्रयस्य ज्या ३४३८ परम
क्रान्तिज्यया १३९७ गुणिता ४८०२८
८९ त्रिज्यया ३४३८ रहिता जाता राशि
त्रयस्य दिनव्यासदले ३१३५।४८ ॥ अ
थ त्रिभयुक्कर्णार्थसाधने ॥ राशित्रय
स्य परमक्रान्ति २५ अस्योन्नमज्या २९८
१२ अनयास्त्रिज्या ३४३८ रहिता जाता त्रि
भयुक्कर्णार्थः ३१३५।४८ इयमेवान्य
त्रिज्या यत्राशित्रयस्य दिनव्यासदलेन देव
त्रिभयुक्कर्णार्थेनापि हितो भवेन एकादि
राशिजीवायास्त्रिभयुक्कर्णार्थतत्पाकः ॥
उदाहरणं ॥ एकराशिज्या १७१९ त्रि
भयुक्कर्णेन ३१३५।४८ गुणिता ५३९०
३१९।१२ एकराशिदिनव्यासदले ३३९
५।३९ भक्तालब्धं १५८३०।४० अस्माद्ध
नुर्जाता मेषस्य वेलाकाया १२९५।३५
८३ भिरक्तलब्धं वेलाकाया मेषोदयः १७८
राशिद्वयस्य ज्या २९७८ त्रिभकर्णार्धे
न ३१३५।४८ गुणिता ९३३५०३२४
२४ राशिद्वयस्याहोरात्रार्धेन ३२१९।१
२५ भक्तालब्धं द्वयोदयः २९९९ राशि

स्मृति
३
७३

73

त्रयस्यज्या ३४३८ गुणकभाजकयोस्तुल्य
त्वान्निर्विकारैवलब्धा ३४३८ अस्याः धनुः
५४०० एतन्मेषवृषभासवः ३४६
५।४५ शोधिताजाता मिथुनासवो लं
कायां १९३४।१५ षड्भिर्भक्तैर्लब्धे मिथु
नोदयः ३२२ अनयारीत्योदयानामा
नीतिः मेषस्य १६७० वृषस्य १७९५
मिथुनस्य १९३५ कर्कटस्य १९३५।
सिंहस्य १७९५ कन्यायाः १६७० तुलै
यास्य १६७० वृश्चिकस्य १७९५ धनु
षः १९३५ मकरस्य १९३५ कुम्भस्य
१७९५ मीनस्य १६७० एतैः षड्भिः भ
क्तानाः पलात्मकाः २७८ । २९९ ।
३२२ । ३२२ । २९९ । २७८ । अनेनैवक्र
मेणतुलादयः ॥ ॥ अथेभ्यः स्व
देशोदयास्तज्ज्ञानार्थमाह ॥ स्वदे
शचरखण्डोनाभवेन्नीष्टोदयासवः ॥
एतेभ्यः मेषादित्रयाणां स्वदेशीयचर
खण्डकैः ऊनाः स्वेनइष्टोदयासवो भव
न्तिः चरानयनरीत्याकादिराशीनां चरख
नीयस्याप्यथः शोधितानि मेषादिरा
शित्रयाणां चरखण्डानि ॥ उदाहर
णे ॥ एकराशिज्याकोटिज्या ?।५८।
३०। पलभया ५।४५ गुणिता ४०।

९।२२। द्वादशभिर्भक्तेलब्धेद्विनिज्या ३२
४।४२। त्र्यंशत्रिज्यया ३४३८ गुणिता १
१५०९४२।१८ एकराशेर्दिनव्यासदले
न ३३९५।३९ भक्तेलब्धेचरज्या ३४२।।
५। एषाधनुः जाता एवं मेषचरज्यास
वः ३४२ षड्भिर्भक्तेलब्धेप्रथमचरखण्डं
५७ राशिद्वयस्यक्रान्तिज्या २।०।४ पल
भया ५।४५ गुणिता ९४५७।५३ द्वा
दशभिर्भक्तेलब्धेद्विनिज्या ५७९।५९।
त्र्यंशत्रिज्यया ३४३८ गुणिता १९९३४९९०
१४ राशिद्वयस्यदिनव्यासदलेन ३२।९३
९ भक्तेलब्धेचरज्या ९।१९।४४ एषाधनुर्जा
ता राशिद्वयस्यचरज्यासवः २८०।
२९ षड्भिर्भक्तेलब्धेद्वितीयचरखण्डं ४७
राशित्रयस्यक्रान्तिज्या १३९७ पलभया ५
४५ गुणिता ८०३२।४५ द्वादशभिर्भ
क्तेलब्धेद्विनिज्या ९७९।२३ त्र्यंशत्रिज्य
या ३४३८ गुणिता २३०१३३२।४५ रा
शित्रयस्यदिनव्यासदलेन ३१२९।४८ भ
क्तेलब्धेचरज्या ७३२।५७ एषाधनुर्जाता
राशित्रयस्यचरज्यासवः ७३८।३८ एत
स्माद्द्वितीयचरज्यासवः ९२३।२ शो
धिताजाताः तृतीयचरज्यासवः ११५।३
९ षड्भिर्भक्तेलब्धेतृतीयचरखण्डं १९

सू.सि.
उ.
७५

75

पवेजानानिचरखण्डकानि ५०।४९।२२
अथाविशिष्टराशीनामुदयमाह ॥ ॥
चलार्कस्तैर्युताः स्वैः स्वैः कर्कटाद्याः न
थात्रयः उत्क्रमेणषडेवेनेभवंतीष्टाः तु
लादयाः ॥ ४५ ॥ तदनन्तरं पलेमे
षादिलंकोदयः सर्वेश्चलाः स्थापिताः स्वैः
स्वैः मेषादिचरखण्डैः त्रिभिः युताः।
कर्कटादयः क्रमेणभवंति पुनेउत्क्रमे
षादयाः षट्संख्यकाः उत्क्रमेणतुलाद
याः षड्राशयः इष्टज्ञाः स्वदेशोदयाभ
वंति ॥ उदाहरणं ॥ मिथुनासवः १९
३५ प्रथमचरज्ञास्वभिः ११५।३९ युक्ता
जाताः कर्कासवः २०५१ सिंहासवः १७
९५ चरज्ञास्वभिः २८०।३ युक्ताः सिंहास
वः २०७९ कन्यासवः २०१२ चरज्ञास्व
भिः ३४२ युक्ताः जाताः कन्यासवः २०१
२ एतएवमुत्क्रमेणतुलादिषट्कस्य प
वेजाताः स्वदेशोदयः मेषस्य १३२८ वृ
षस्य १५१४ मिथुनस्य १८१९ कर्कटस्य
२०५२ सिंहस्य २०७९ कन्यायाः २०१२
तुलायाः २०१२ वृश्चिकस्य २०७९ धनु
षः २०५१ मकरस्य १०१९ कुम्भस्य २
५१४ मीनस्य २३३८ एतेषड्भक्ताः जा
ताः पलाद्याः।२२।।२५३।३०४।

३५२ । ३४५ । ३३५ । व्युत्क्रमेणानला
द्याः ॥ अथस्वोदयानेष्टाभुक्तानि ।
यथास्वेष्वेषोयोगैः षट्शतयुक्तः एकवि
शतिसहस्राणि २१६०० तथाष्टान्य ।
थाभुक्ताः अत्रार्थीमपिकेहस्वेरेसति
उपरिसेवनायथानेनरेनपतनितथाका
र्यम ॥ अथाभीष्टकालेआणयनलग्न
साधनार्थंगतभोग्यासूनाह ॥ गतभो
ग्यासवःकार्याःभास्करादिष्टकालिका
त् स्वोदयासहनाभुक्ताभोग्याभुक्तास्तव
क्तिभिरिति ॥ इष्टकालादिष्टकाल
वालिनात्सूर्याद्गतभोग्यासवोगतासवो
वभवंतिकथमित्यतआहस्वोदयासह ।
नाहतिभुक्तभोग्यासूर्याक्रान्तराशयोभु
क्तभागाविद्यमानभागाश्चवयवात्मकाः
एतेत्रिंशताःभुक्ताभोग्यभागाःसूर्याक्रा
न्तराशेः स्वदेशोदयाः त्रिभिः गुणिताः
स्ववाक्तिभिः त्रिंशताः भक्ताः गतासवोभो ।
ग्यासवः क्रमेणभवंति ॥ उदाहरणं ।
इष्टघटीः १० वालितसूर्यः १० । ५ । ५
१ । ५ अयनांशः १६ । ५२ । ४७ सहि
तः १ । २२ । ३२ । ५२ इष्टस्वोदयः १५ । १४
अस्याभुक्तांशाः २२ । ३१ । ५२ । गुणितः
३४।१३२ त्रिंशताभक्तोलब्धाभुक्तासवः

स्तुसि
उ·
७५
75

॥३८॥ अथाभीष्टघटिकाप्रकरणं।
धनलग्नसाधने घटिकामाह ॥ अभीष्टघ
टिकासमभ्यो भोग्यास्तं विशोधयेत नष्ट
देषलग्नास्तन्यानेतेष्वेवकुलक्रमात । शे
षेविंशताभक्ते मध्युद्धेन विभाजितम भा
गादियुक्तेहीनेवनलग्नेहितिजेभवेत ॥
अभीष्टकालसूर्योदयाद्याघटिकाला।
सासमभ्यो भोग्यास्तं शोधयेत नष्टैवे
षलग्नास्तेसूर्याक्रांतराशेरग्रिमराशय:
तेषामुदयास्तं शोधयेत एवंशेषघटि।
कासमभ्यो जातोभुक्तराश्युदयास्तं त्वकुलक्र
मेण नष्टा शोधयेत शेषेविंशतागुणि
तेयोराश्युदयोनशुद्ध इति सोशुद्धेन भक्तेलि
ष्टेन भागादिना शुद्धराशिसंख्यामानेन ही
नेभमपसंशुद्धभादिलब्धेन युक्ते शुद्धराशि
संख्यामानेनन आगतराशुद्धादि हि
तिजमूर्तेः शर्वविभागेलग्नंस्यात ॥ उ
दाहरणं ॥ इष्टघटी: १० षष्टिगुणि।
ता ६०० पुनः षड्गुणिता जाता असव:
३६०० एते भोग्यासवैभि: ३२८ हीना:
शेषं ३२७२ एतेभ्यो मिथुनासव: १८
६७ शोधिता शेषं १४०५ । त्रिंशद्गुणि
ते ४२१५० अशुद्धोदयेन २०५१ भक्ते
लब्धं भागादिफलं २० । ३३ । ३ इदम

शुद्धात्सूर्येनैवपर्यंतराशिभिः २ युक्तोजा

तेसायनलग्ने २।२०।३२।३ अथवासा

यनसूर्यः १।२२।३२।५२ भोग्यभागाना

७।२७।८ भुक्तः २।७।७।७ अथैभागा

दिलब्धेन २०।३३।३ युक्तः २।२०।३३।

३ अथैशुद्धसंख्योराशिभिः २युतेजातेन

लग्ने २।२०।३३।३ ॥ अथलोलग्नसा

धने ॥ शेषे १५८५२ पलन्मध्येमे

षोदयः १२२८ शोधितः शेषे १२६२४

शेषान्मकरोदयः २०७५ शोधितः शेषे

७५४५ शेषात्तुलोदयः २०१२ शोधितः

शेषे ५७२४ शेषात्कन्योदयः शोधितः

शेषे २७२२ शेषात्सिंहोदयः २०५७शो

धितः शेषे १०८७३ शेषाङ्कत्र ५५ त्रिंश

द्गुणिते १५३८० अशुद्धोदयेन २०५१।

भक्तोलब्धेभादिफले ५।२५।५५।३३।

सायनसूर्यः १।२२।३२।५२ भुक्तभागा

दिना २२।३३।५।२२ रहितः २०।०।२०

० अथैभागादिलब्धेन ५।२५।५५।३३

हीने ०।३०।३३।३ अथैशुद्धसंख्योरा

शिभिर्हीनाः मानेनदेवसायनलग्नेऽत्रा

णसंज्ञके ३।२०।३३।३ यदिराशि

स्थाने शुद्धसंख्योराशयोन शुद्धान्ते तदा

राशिस्थानेद्वादशार्योज्या इति ॥ ॥

सूसि
५.
७९

76

अथसायनलग्नंसाध्यमितिकालदिनागत
त्वात्केवलसूर्यात्साध्यमितिश्रुतिभातितन्न
सूर्वंसूर्य   नसंस्कारस्यतत्संस्थानाक्रां
तिच्छायावारवलादिकंसाध्यमित्युक्तत्वात्
नहिदृश्यापिसायनसूर्यात्लग्नंसाध्यमितिसू
चितेनतलग्नेसायनेसमायाति ॥ ततल
लग्नेभगवताश्रीसूर्येणायनांशरहितेका
र्यमिति कथितेनोक्तत्वाद्युयाच्छिन्नमेवग्रा
ह्यमितिउक्तः श्रोतादिसाधनेसायनात्का
र्यमित्युक्तत्वात् ग्रहस्पष्टवासिद्धसिद्धा
न्तादिषुसायनात्सर्वेव्यापारः ह्रतोऽस्मि
लग्नसाधनेयनांशरहितेलग्नेकार्यमितितो
के ग्रन्थेणवार्यैर्भास्करादिभिरयनांशर
हितात्सर्वादीभवतीतिग्रन्थलेहृश्यते ॥
अथमध्यलग्नानयनमाह ॥ प्राक्पश्चा
मनतनाडिभ्यः तस्माल्लंकोदयासुभिः भा
नौतयथनेह्रीनामध्यलग्नेनदाभवेत् ॥
दिनाधीन्मूर्वदिनगतेदिनार्धादूनेदिन
शेषे ततदिनार्धात्प्रोध्यत्तकर्मणापूर्वप
श्चिमनतेरात्रिशेषगतयुतेदिनार्धपूर्वप
श्चिमनतेनतघटिकाभिः तस्मात्तात्काल
कसूर्यात्लंकोदयासुभिः पूर्वोक्तप्रका
रेणभागादिफलेप्राक्पश्चिमनतेक्रमेण
भानौतयथनेह्रीनयुतेसतत्वात्तदाभोष्ट।

कालेमध्यलग्नेस्मिन् अयमाशयः स्फुटेन
नेनसममिष्टकालेप्रकल्प्यायोग्यलग्नसा
साधनेपश्चिमनतेननमिष्टकालेप्रकल्प्य
धनाख्यमध्यलग्नमिति ॥ उदाहरणम् ॥
दिनार्धं १५।२८ इष्टघटीभिः १० रहि
तेनातेस्फुटेननते ५।२८ षड्गुणिते ३२।४८
पुनःषड्गुणे १९६।४८ अयमेवेष्टकालः अ
स्मान्मकायनसूर्यः ११।१।२२।५२ अस्योद
यः २७।५५ भक्तेनांशे २२।३२।५२ गुणिताः
४०।४० त्रिंशत्तिभक्ताः लब्धभुक्तासवः १२
४१ अनेनहीनोस्मात्मकइष्टकालः २३७
५ शेषे १०२७ पञ्चमस्येष्टोदयः १५७० न
भुक्तेति अतःशेषे १०२७ त्रिंशन्निगुणिते ३
०८१० अयंभादिलब्धेन १८।२५।५४ रहि
तः ०।११।३३।४ अयंस्पष्टः ॥ भोग्या
सन्नभुक्तस्याथभुक्तास्वनधिकस्यैव संपी
उनातलग्नास्तेनवेस्याकालसाधनम् ॥
लग्नार्कयोर्मध्येयज्ञनलग्नस्य भोग्यांसवो
ग्राह्याः अधिकस्यभुक्तासवोग्राह्याः संपी
ड्यभोग्यभुक्तास्वनेकीय अन्तरलग्नासून्स
यंलग्नयोर्मध्येयेलग्नराशयस्तेषामुदया
सूनसंयोज्यैवमुक्तप्रकारेणकालस्यसाध
नेसिद्धिर्भवति ॥ उदाहरणं ॥ सायन
सूर्यः ११।१।२२।५२ सायनलग्ने ३।१०।३३।२

सूति
उ.
११

अनयोर्मध्ये सूर्यस्य न्यूनत्वाच्छोधयामसेवोः सू
र्यस्य ३२९ लग्नाधिकत्वात्भुक्तासवोल
ग्नस्य १५०५ अनयोर्योगः २७८१ अनयो
र्दयेन १८१५ युक्तः ३५०० षष्ट्याभक्ते ल
ब्धे ५० पुनः षड्भक्ते लब्धमिष्टघटिका १०
अथागतकालस्य दिनरात्र्यागतेन तत्त्वज्ञानो
माह ॥ सूर्याल्पेने निःशुद्धशेषे लग्नेको
दयिके दिवा भवञ्चार्थयुताञ्ज्ञानाद्यधिके
समयान्तरेम ॥ सूर्यान्न्यूनेलग्नेसति स
र्वप्रकारेणागतः कालो रात्रिशेषो भवति ।
सूर्याद्धिके लग्नेसति पूर्वप्रकारागतः काले
भवति षड्युतात सूर्याद्धिके लग्ने आगतः
कालोऽस्तमयात सूर्यास्तकालान्तरमनल्प
रात्राविन्यस्थः गतेष्टकाले सषड्भसूर्या
ल्लग्ने साध्यमिति सूचिते अयमाशयः सूर्या
न्न्यूनेलग्नेसति सूर्यस्य भुक्तकालः साध्यः
लग्नस्य भुक्तकालः अनयोर्योगः मध्योदये
युक्तः कार्यः सूर्योदयात दिनगतकालो
भवति सषड्भसूर्यान्न्यूनेलग्नेसति उक्त
वदागतकालो दिनशेषो भवति सषड्भा
धिके लग्नेसति उक्तवदागतकालः सू
र्यास्तादूतकालो ज्ञेयः ॥ ॥ विष्णु
नाथेन रचिताया गहनार्थप्रकाशिका व
नीयाद्भवत्तस्याःशालात्रिप्रश्नरूपिणी ॥

इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथ
दैवज्ञविरचितायां सूर्यसिद्धान्तटीकायां
त्रिप्रश्नाधिकारः समाप्तः ॥ ३ ॥ ॥
अथ चन्द्रग्रहणाधिकारो व्याख्यायते ॥
संवत् १६७७ शाके १५४२ मार्गशुक्ल
१५ बुधे चन्द्रपर्वसाधनार्थमहर्गणः
गताब्दाः १९५५८८३१७९ नृपशाक
वर्षस्य १५४२ युक्ता जाता इष्टकालिक
गताब्दाः १९५५८८४७२१ द्वादशभिः
गुणिताः २३४७०६१६६५२ गतमा
सयुतः २३४७०६१६६६० इमे पृथ
क्स्थाः २३४७०६१६६६० एभिरा
धिमासैः १५९३३३६ गुणिता ३७३
९६६५७८४६६५७७७६० सूर्य
मासैः ५४८४०००० भक्तालब्धाधि
मासाः ७२१३८४६१५ अधिशेषं २४
९७७७६० लब्धाधिमासकैः ७२१३८
४६१५ पृथक्स्थाः युक्ताः २४४१९२००१२
७५ त्रिंशद्भिः ३० गुणिता दिनीकृ
ताजाताः १८२०३६९६६२२७७२९०५
२८ चान्द्रदिनैः १६०३०००००८० भ
क्तालब्धावमाः ११३५६०१७०००७ शे
षं ४७४९२९५६८ पृथक्स्थाः अ
वमैः रहिताः जाताहर्गणः ७२४४०

ज्यो सि
३
७८

78

४०११५७ अभीष्टवर्षार्थमेकः कल्पो
ज्ञानेऽह्नगणाः ७१४४०४०२२५८ र
विभगणाः ३३२०००० गुणिताः ३०८
६२२५३४१६३४५९०००० कुदिनैः
१५७७९१८८२८ भक्तेलब्धेराशयः ८
शेषे ८६५९०५५१० त्रिंशद्गुणे १५०
७१६५५९०० कुदिनैर्भक्तेलब्धमंशाः
० शेषे १५०७१६५५९०० षष्टिगुणे ८
४४१५५३९००० कुदिनैर्भक्तेलब्धेका
लाः ५३ शेषे ८००२५१११९ षष्टिगु
णे ४८०१८४९५९५९० कुदिनैः भक्ते
लब्धेविकलाः ३० एवंराश्यादिरविः ८
११५३।३० ॥ अथ वेद्मसाधनं ॥ अह
र्गणाः ७१४४०४०१५१५८ वेद्मभग
णाः ५७७५३३३९ गुणिताः ४११५५
११५४७९४९४९४१५९८८ कुदिनैः
१५७७९१७८२८ भक्तेलब्धे वेद्मभगणाः।
३९१४७८८५५५७ शेषे १८४५९११
७१ द्वादशगुणे । गुणे ३४१५५५९०९
४ कुदिनैर्भक्तेलब्धेराशयः शेषे १९३७
१०४०८ त्रिंशद्गुणे ५१३९११८० कुदि
नैर्भक्तेलब्धमंशाः ५ शेषे ११७१३१००
षष्टिगुणे १३०३३८५०००० कुदिनैर्भक्ते
लब्धेकलाः ० शेषे १३०३३८५००००।

षष्टिगुणे ८००००९१९०००० कुदिनै
र्भक्तेलब्धेविकलाः ५० एवंराश्यादिरि
न्दुः ३।५।११।५० ॥ अथरविमन्दोच्चसा
धने ॥ अहर्गणः ७१४४०४०२।२।
५८ रविमन्दोच्चभगणैः ३८७ गुणित
तः १७९४७९३५९२२९८४९ कल्प
कुदिनैः १५७७९१७८२८००० भक्तेल
ब्धेरविमन्दोच्चभगणाः १७५ शेषं ३३७८
९३२९८४९ द्वादशगुणे ४०९४८३१
५९१२।५१२ कलाकुदिनैर्भक्तेलब्धेराशयः
१ शेषं ४० ५१०००१२९९१५१ त्रिंशद्गु
णे १२१२००००७५१८४५५९० कलाकु
दिनैर्भक्तेलब्धेभागाः १७ शेषं ४४४४
०४५१०८५५९० षष्टिगुणे २९७१४१९
४५१३९११ कलाकुदिनैर्भक्तेलब्धेक
लाः ५९ एवंरविमन्दोच्चराश्यादि २।१७
१९।५९ ॥ अथचन्द्रोच्चसाधने ॥
अहर्गणः ७१४४०४०२५१२८ चन्
द्रोच्चभगणैः ४८८२०३ गुणितः ३४८
७७४१८९३५०१२५१३७४ कल्पकुदिनैः
१५७७९१७८२८ भक्तेलब्धेचन्द्रमन्दोच्चभ
गणाः २२१०३४४५। शेषं १३३४३०५
२२९ द्वादशगुणे १९०११९९२७१२ कु
दिनैःभक्तेलब्धेराशयः १० शेषं २३२४८

सृमि
ऊ·
७५
79

४४३२ त्रिंशद्गुणे ९५८७४५३२५९०
ज्ञे दिनैः भक्ते लब्धमंशाः ४ शेषं ९९९२८
९१९४८ षष्टिगुणे ३२७७१९२५८८०
ज्ञे दिनैर्भक्ते लब्धं कलाः २५ शेषं ३३३२
५३१८० षष्टिगुणे १२४४५५१२०८००
ज्ञे दिनैर्भक्ते लब्धं विकला १४ एवं ताष्णा
दिवेशोस्य १।४।४।२५।२२ ॥ अथ वे
ङ्कपातानयने ॥ अहर्गणाः ७१४४०४
४०३१२५८ वेङ्कपातसमभगणैः २३३२
३८ गुणिताः १९४५११७९१०८८०१२
१४४०४ युगकुदिनैर्भक्ते लब्धं वेङ्कपाता
नभगणाः १०५१४९००८ शेषं ५१३२
८४७८० द्वादशगुणे ९९७३४९७३९०
ज्ञे दिनैर्भक्ते लब्धं राशयः ३ शेषं १५३२
९९३४७९ त्रिंशद्गुणे ४९१८२२९२
८० ज्ञे दिनैर्भक्ते लब्धमंशाः ३ शेषं ४३०
२२२१९२८ षष्टिगुणे २५८१७२५९०
८० ज्ञे दिनैर्भक्ते लब्धं कलाः १९ शेषं ५
७११७०८१२ षष्टिगुणे ३४१७८१४४२
१० ज्ञे दिनैर्भक्ते लब्धं विकलाः ११ एवं वे
ङ्कपातः ३।२९।१९।११ । बुधशुक्रोच्चा
नोगाद्रः ८।१०।४३।३२ द्वेपातनामंक्षि
नोगविः ८।१०।५२।४१ । केतुः ३।५।४
२।४५ राहुः ८।१०।४३।४१ । रवेर्मंदो

स्फु २।१८।१९।५९ वेद्वोस्फु १०।४।१५
७ रवेर्मंदकेन्द्रं ९।१९।४।१५ अस्या
भुजज्या ५।७।०।३० मंदपरिधि: १३
५५ मंदफले ३७।३१ कलात्मककेन्द्र
स्यानुलाद्रिकानऋणं अनेन ३७।३१
रविमंदगति: ५९।८ गुणिता २२।८
१ वेद्रस्यभुजफले ऋणकेकोष्ठ ११२२मे
स्फुत: वेद्र: २।४।४८।१३ मवक्रालि
प्ताभि: २१९०० भक्ते लब्धं भुजफले कला
द्यं ०।१९ ऋणं अनेन संस्कृतो रवि: ८।०
५२।३५ अस्य भुजफले ०।० संस्कृते वेद्र
स्फु १०।४।५।७ ॥ अथ सूर्यस्पष्टीक
रणं ॥ रवेर्मंदकेन्द्रं ९।१९।४।११ अ
स्य भुजज्या ५।७।३९ स्पष्टपरिधिना १३।
५५ गुणिता १३५०७।३१ भगणांशै ३
६० भक्ते लब्धं ३७।३१ अस्य धनु: जाता
कलादि मंदफल ३७।३१ इदं षष्ट्या भक्ते
जातं मंदफलादि विमंदफले ऋणं ०।३७।
३० अनेन संस्कृत: जात: स्पष्ट: सूर्य: ८।०
१५।४ मंदकेन्द्रस्य दोर्ज्या त्रिप्रमाणेन वा
कयोरन्तरेण २१५ गुणिताभुक्ति: १२७२।
२१४० नवलोचनै: भक्ते लब्धं ५३।३ इदं
स्पष्टपरिधिना १३।५५ गुणितं ७२४।२१
भगणांशैर्भक्ते लब्धं कलादि गतिफले क

80

कोटिकेन्दुलावृत्ते २।१० अनेनमेरुत्तानां
नासाष्टागतिः ९।१८ केन्द्रः २।४।४
८।२३ उच्च १०।४।२५।१७ मेन्द्रकेन्द्रे ७।२
४।३९।४४ भुजः ०।२५।३९।४ जी
वा २८९५।।४। स्पष्टःपरिधिः ३१।४।१
अनेनभुजज्यागुणिता ५४ ९।। ९५ भ
गांशैः ३६० लब्धे २९।।४९ यत्रः ५ मे
ट्फलेकलाद्ये २९।।२५ षष्ट्याभक्तमेषा
द्ये ४।२।।१५ ऋणेस्पष्टकेन्द्रः २।०।२९।
५८ केन्द्रगतिः ७५०।३५ मेन्दोच्चगत्याः ९
४।। रहितानामानाकेन्द्रगतिः ७८३।५४
स्वएककोनोन्तेरणगु ११५ गुणिता ५३२८।४
९ तत्वनेत्रोद्धृते ४।।४।२५ स्पष्टपरिधि
ना ३१।४३ गुणिता १३।४४।।२ भांशैः
३६० भक्तेलब्धेकलाद्येगतिफले ३९।
३१ गतोधने ७५०।३५ केन्द्रस्पष्टगतिः
८२७।१९ ।। अहर्गणाः ७१४४०४०२
११५८ अयनभगणैः ६०० गुणिताः४
२८९४२४९२७५४८०० युगाकदिनैः
१५७७९१७८२८ भक्तेलब्धे अयनभगणाः
२७।१९५० शेषे १०३४७७८९०० द्वादश
गुणे १२४।०३४३१०० भूदिनैर्भक्ते राश
यः ७ शेषे १३७।५।८४०४ त्रिंशता
गुणे ४।५७५५५२।१० भूदिनैर्भक्ते।

शेषा: ३३ घाते १३।९८८५।३३ षष्टिगुणे ७।५
०।१३३५।५।१० भूदिनैः भक्ते लब्धे कला: ५।
घाते ११७२९३८०० षष्टिगुणे ७०३५८।८
०० कुदिनैः भक्ते विकला: ५० शेषाः प्रागादि:
७२९।५ भुजः ११।२८।५।० शेषा: ५९
५।० त्रिगुणाः १९८।५।० दशभिर्भक्ते लब्धे
मेषा: १९।४९।३० ॥ अथ दिनमानसा
धने ॥ सूर्यः ८।०।१५।४ सायनः ८।१
७।४।३४ भुजज्या ३३।४९ परमक्रान्तिज्या
या १३५७ गुणिता ४९८८८७८५८ त्रिज्या
या ३४३८ भक्ते क्रान्तिज्या १३९०।५५ ध
नुः जाता क्रान्तिः १४००।२३ अस्या उत्क्रम
ज्या १८।१।४४ अनेन हीनः त्रिज्या जातम
होरात्रव्यासदले ३।५३।।। क्रान्तिज्या १३९
०।५५ पलभया गुणिते ७८।२५।१८ द्वाद
शभिर्भक्ते लब्धे क्षितिज्या ९५२।१९ इयं त्रिज्या
गुणिता २४।१।९४८ अहोरात्रव्यासार्धे
कर्णेन ३।५९।।। भक्ते लब्धे चरज्या ७१०
।१ एषा धनुः जाता: चरजासव: ७।५।२३
सायनसूर्य: ८।१।७।४।३९ अस्योदयः ३
४२ षट्गुणासवात्मक: २०।५२ अनेन सूर्य
स्य भोग्यगति: ९।१।८ गुणिता १२।५४।४
५।३९ अनेन भक्ते ८०० लब्धे ९।४।४।अ
नेन चक्रासव: ११९०० युक्ता: सा होरात्राम

सूर्य
उ.
८१

81

वः।१९५।४। अथ चन्द्रेष्टः ५४।१५ रवेर्दृ
ग्गणकोनितावस्थायनष्ट ७।५।१३ रविहितः ना
तेदिनार्धे १३।१३ द्विगुणितेजातेदिनमाने २६।
२६ रात्रिमाने ३३।५४ मिश्रकालः ४३।१३ आ
भिःघटीभिः ४३।१३ पूर्वकालिनोजातोसूर्यो
दयकालिकोरविः ७।२५।३३।१३ चन्द्रः ११।०
३३।३१ अथोपर्वान्तेकालोघट्यात्मकः ४२
७ आभिःकालिनोजातःपर्वान्तकालिकः
सूर्यः ८।०।१४।७ चन्द्रः ११।४।७।० राहुः ८
०।४३।५४ रविगतिः ६१।० चन्द्रगतिः ८१
७।६ ॥ अथ सूर्यचन्द्रयोः बिम्बयोजनानि
तत्स्फुटीकरणं च सार्धश्लोकेनाह ॥ सार्धा
निषट्सहस्राणि योजनानि विवस्वतः । विष्क
म्भो मण्डलस्येन्दोः सहाशीत्या चतुःशते ॥
स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ
इति ॥ षट्सहस्राणि सार्धानि सार्धपञ्च
शतेन षट्सहस्रवर्तमानानि पञ्चषष्टिशतयोज
नानि विवस्वतः सूर्यमण्डलस्य विष्कम्भः व्या
सः इन्दोः चन्द्रस्य गोलाकारबिम्बस्याशीत्या
सह चतुःशतयोजनानि तौ व्यासौ स्फुटस्व
भुक्त्या स्पष्टया स्वभुक्त्या गुणितौ स्वमध्यग
त्या भक्तौ स्फुटौ स्तः ॥ उदाहरणं ॥ सूर्य
स्य व्यासः ६५०० स्पष्टगत्या ६१।८ गुणि
तः ३९७३८६६।४० मध्यगत्या ५९।८ भ

न्तः लब्धं सूर्यस्य स्फुटव्यासः ५०१।१० ।।
अथ सूर्यचन्द्रयोः कलात्मकबिम्बानयन
माह ।। रवेः स्वभगणाभ्यस्तः शशी च
भगणोद्धृतः शशाङ्ककक्षागुणितो भा
जितो वार्ककक्षया ।। विष्कम्भः चन्द्रक
क्षायोस्तिथ्याप्ता मानलिप्तिकाः इति ।।
रवेः सूर्यस्य स्पष्टो व्यासः स्वभगणैः सूर्यभ
गणैः गुणितः चन्द्रभगणैः भक्तः ।। अ
थवा वक्ष्यमाणया चन्द्रकक्षया गुणितः
वक्ष्यमाणसूर्यकक्षया भक्तः चन्द्रकक्षा
यां विष्कम्भः सूर्यव्यासः स्पष्टो भवति त
मः स्पष्टव्यासयोजनसंख्याः तिथ्याप्ताः
पञ्चदशभक्ताः मानलिप्तिकाः सूर्यचन्द्र
योः बिम्बव्यासप्रमाणकला भवन्ति ।।
उदाहरणं ।। सूर्यस्य स्पष्टव्यासः ८७४
८।। सूर्ययुगभगणाः ४३२०००० गुणि
ताः १५।१५।४३२०००० चन्द्रयुगभगा
णैः ५७७५३३३६ भक्तो लब्धं चन्द्रक
क्षायां सूर्यकक्षाया ४३१५०० भक्तः ल
ब्धेन चैव सूर्यव्यासः स्पष्टः ४८७४८ सूर्य
भगणैः ३२१०००० गुणितः १५।१५।४
३१०००० चन्द्रभगणैः ५७७५३३३६ भ
क्तः लब्धं चन्द्रकक्षायां रविव्यासः स्पष्टः ।
५०४।४५ अथ पञ्चदश १५ भक्तः ल

सूसि
उ०
८२

82

ऽस्तसूर्यबिम्बकला: ३३।३५ चेद्व्यास: ५०
१।१० पंचेष्टशाभक्त: लब्धेंद्रबिम्बकला:
३३।१८ ॥ अथ भच्छायायाश्चोकाभ्यां सा
धयति ॥ स्फुटेंदुभुक्तिर्भूव्यासगुणितं
मध्यभोद्धृता लब्धस्त्रीमहीव्यासस्फुट
र्के: श्रवणान्तरम ॥ मध्यान्दुव्यासगु
णितो मध्यार्कव्यासभाजितं विशुद्धाथ
लब्धस्त्र्यान्तमोलिप्तास्युर्यवत ॥
स्फुटेन्दुभुक्ति: स्फुटचंद्रगति: भूव्यासेन
गुणिता: मध्याचंद्रगत्याभक्ता ल
ब्धस्त्रीमंत स्यात भूव्यासस्पष्टसूर्यव्या
सयोरन्तरं मध्यचंद्रबिम्बव्यासेनागुणन्या
धिकाचन्द्र: स्फुटयोजनेन गुणितो मध्यार्क
व्यासेन मध्येन सूर्यबिम्बव्यासेन पंचष
ष्टिपातयोजनेन भक्तो लब्धस्त्र्यां बिम्बवि
शुद्धान्तोहनपाधनमा भूच्छायायाः पेयो
जनात्मकं स्यवत लिप्तामानाले
सिका इति पूर्वोक्तेनच्छायाकाल: क
र्ण: श्रवव्यासशब्द: कर्णेवाची: ॥
उदाहरणं ॥ स्पष्टचंद्रगति: ८२७।४५
भूव्यासेन १६०० गुणिता १३२३५२०।
० मध्याचंद्रगत्या ७९०।३५ भक्तालब्धा
ब्धस्त्री १६७३।५५ महीव्यास: १६०
० पुत्रमानोनमस्फुटव्यास: ५७४८।१

अनयोरन्तरं ५।४८ मध्यचन्द्रबिम्बव्यासेन।
४८० गुणितं २४३।०४८०।० मध्यमसू-
र्यबिम्बव्यासेन ६५०० भक्तो लब्धं ३८०।सं-
स्कृता १६३३। ५४ रहिते १२४३।४५ चं-
द्रग्रासभक्तेन मोमानकला: ८६।१५ अ-
स्तनामोनरेभ्भा ॥ अथ ग्रहणद्वयसं-
भूतिमाह ॥ भानोर्भार्धे महीसून्वायातो
नतुल्यकसमे पि वा पाते वा पातग्रहणं।
कियद्भागाधिकोनक: इति ॥ भानो:
सूर्यात् भार्धे षड्भान्तरे भसून्वायाते तुल्ये सम-
षड्भे चन्द्रपस्थायायया --- दिनासमे चन्द्रपा-
ते ऽथवा सूर्यतुल्ये चन्द्रपाते सूर्यचन्द्रयो: ग्र-
हो वा प्रत्येकं प्रत्येकं ग्रहणं तत्समत्वाभा-
वे पि ग्रहणमित्यत: आह कियद्भागेत्या-
दि षड्भाकोद्भावानिपथै: भागैरधिकै:
ऊनैरपि चन्द्रपाते ग्रहणं ॥ ९ ननु तनु-
वभावेनोन्यत: तयो: ग्रहणयो: कालमा-
ह ॥ तुल्यारागणादिदि: स्पातोमसमावा।
स्यान्तकालिको सूर्यग्रहपौर्णमास्योनेभा-
र्धे भागादिकौ समौ ॥ अमावस्यान्तका-
लेन्तु सूर्यचन्द्रौ तायग्रणाद्यवयवैस्तुल्यो भवा-
तः पौर्णमास्यन्ते सूर्यचन्द्रौ षड्भान्तरे भागा-
धिकौ तुल्यौ स्यातां १ ॥ अथ पर्वान्तेसू-
र्यचन्द्रपातानां साधनमाह ॥ गतेष्व-

पर्वनाडीनोस्वपलेर्धेनसंयुतो ममलेसौ।
भवेतां तौ पातस्तात्कालिको न्यथा ॥ तौ
सूर्येन्द्रौ अर्धरात्रकालिकोसतौ -- प
र्वनाडीनो अर्धरात्रा नो पौर्णमास
न्तघटिकान्तमोस्वपलेन इष्टनाडीगुणा
भुक्तौ नित्यनेनानीतेगतेनष्टक्रमेणाडीनोन।
समसपलौ ततः पातस्यगात्युत्पन्नपलेन।
गतैष्यक्रमेणान्यथाऽयुते न तात्कालिकः
पर्वान्तकालिकः स्यात् ८ ॥ अथ सूर्यो
ऽनोविमानोऽश्रयोजनमाह ॥ छाद
को भास्करस्येन्दुरधःस्थोयनवद्भवेत् भू
च्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ
भास्करस्य सूर्यमण्डलस्येन्दुश्चन्द्रः छाद
कः स्यात् ॥ नन्वाकाशेद्वयोः समत्वा
न्सूर्यस्यैवेन्दोः साच्छादकः किं न स्यादित्य
तः आह ॥ अधःस्थः इतिवक्ष्यमाणस्सू।
र्यकक्षातोऽधः कक्षास्थानात्वेन्दोः स्याच्छाद
कत्वेन सूर्यस्य छादकः संभवति नत्वे
तत्स्थानस्थाने विना छादने न भवत्यतः आ
ह ॥ घनवदिति यथा अधःस्थो मेघः सूर्य
स्याच्छादको भवति तथा चन्द्रोपि भवतीत्य
र्थः प्राङ्मुखः पूर्वाभिमुखः गच्छंश्चन्द्रो।
भूच्छायां प्रति प्रविशति अतः कारणा
दस्येन्दोः समासो भूच्छायाच्छादिको भवेत्।

तथा च स्पर्शग्रहणे सूर्यचन्द्रबिम्बयोः प्र
योजनं । चन्द्रग्रहणे चन्द्रभूभाबिम्बयोः
प्रयोजनमिति भावः ५ ॥ अथ ग्रासा
नयनमाह ॥ तात्कालिकेन्दुविक्षेप
छाद्यछादकमानयोः योगार्धात्प्रोज्झ्य
यच्छेषं तावत्स्थगितं तदुच्यते ॥ यः छा
द्यते स छाद्यः चन्द्रः चन्द्रग्रहणे सूर्यः सू
र्यग्रहणे छादयति स छादकः सूर्यग्रह
णे चन्द्रः चन्द्रग्रहणे भूभा कलादिके विक्षे
पे यद्वा शोधितं मानैक्यखण्डे ग्रासस्तद्ग्र
हणेन वैकथ्यते ॥ उदाहरणं ॥
पर्वान्तकालिकः चन्द्रः २।०।१९।१७ स्व
पातेन राहुणा ८।०।४२।४४ रहितः
५।२९।२०।२२ अस्य भुजः ०।०।२९।१
३७। जीवा २९।३७ चन्द्रस्य परमशरेण २
७० गुणितः ७१५५९।३० त्रिज्यया २४
३८ भक्तो लब्धं चन्द्रशरः स्पष्टः कलात्मकः
२।१९ चन्द्रबिम्बमाने ३३।३८ भूभामा
ने ८९।१८ अनयोः योगः ११९।४३ अ
स्यार्धं ५९।५१ । शरेण २।१९ रहितं जा
तो ग्रासः कलात्मकः ५७।३२ चन्द्रबि
म्बेन ३३।३८ रहितो जातो खग्रासः ५७।
३२ विंशतिभिः गुणितो ११५०।४० चन्द्र
बिम्बेन ३३।३८ भक्तः फलं विंशोपकाः

सूसि
उ.
८४

84

१४।३२ ॥ अथमेषार्केग्रहणाभावस्तत्रे
वाह ॥ ग्रासमानार्धेनैतस्मिन्काले
न्यूनमन्यथा योगार्धाद्धिकेन स्याद्धि।
पेग्रासस्तेभवः ॥ नास्मिन्ग्रासमानेधिके
ग्रास्यमानात्स्वकालेमस्पर्शोग्रहणंभवति।
अन्यथाग्रासमानानन्तनेग्रासोन्यूनेनस्या
त् योगार्धात्मिभेस्वावण्डाद्धिकेवि।
क्षेपशेषेसतिग्रासस्तेभवः अहणेनस्यात्
अथस्थित्यर्धविमर्धार्धेश्लोकाभ्यामाह ॥
ग्राह्यग्राहकसंयोगवियोगौदलितौपृ
थक् विक्षेपहीनवर्गाभ्यांनहृर्गाभ्याम
भेपदे ॥ षष्ट्यासंगुण्यसूर्येन्दुभुक्त्यन्तरेन
रविभाजितेन स्यातेस्थितिविमर्धार्धेना।
डिकादिफलेनतथा ॥ ग्राह्यग्राहकबिं
बयोः सूर्यबिम्बचन्द्रबिम्बयोः चन्द्रग्रहणे।
चन्द्रभूभाबिम्बयोगान्तरेर्धितेपृथक्स्थितेनो
यष्यानेष्यापितेनहृगोभ्यांयोगान्तरार्धयो
वर्गाभ्यांविक्षेपवर्गेणवर्जिताभ्यांमूलेद्वयोः
पदेमूलेषष्ट्यागुणितेनासूर्यचन्द्रयोर्गत्य
न्तरेणभक्तयोः योगवियोगयोः स्थानेच
टिकादिफले स्थित्यर्धविमर्धार्धेभवतः
उदाहरणं ॥ चन्द्रमाने ३२।२८ भूभामा
ने ८८।०५ अनयोर्योगः ११५५३ अस्या
र्धे ५५।५१ अस्यवर्गः ३५८७।२ शरः

२।१४ भोगा ५।३१ राहुत: ३५।०९।३४।
ग्रासकाले ५५।४८ बाहुगुणे ३५८८।
सूर्यचन्द्रान्तरेण ७९५।५८ भक्ते ल।
ब्धं स्थित्यर्धं ४।४१ पतद्विगुणिते ग्रहणा।
काल: ४।११ ॥ अथ मर्दार्धसाध
ने ॥ चन्द्रमाने ३३।१८ भूभामाने ८९।
१५ अनयोर्योग: ४१।४७। अस्यार्धं २०
५३ अस्य वर्ग: ८५९।४ ग्रास: २।१४व
र्गेन ४४।३१ हीन: ८१०।४२। अस्य मू
ले २८।१७ बाहुगुणिते १५०१ सूर्यचन्द्र
गत्यन्तरेण ७९५।५८ भक्ते लब्धघटिका
दि विमर्दार्धं ११२ पतद्विगुणिते मर्दस्य
ग्रहणे विमर्दकाल: ४।१९ ॥ अथ स्थि
त्यर्धविमर्दार्धे असकृत्साध्ये इति श्लो
काभ्यामाह ॥ स्थित्यर्धनाडिकाभ्यस्ता:
गतय: षष्टिभाजिता: लिप्तादिप्रग्रहे शो
ध्यं मोक्षे देयं पुन: पुन: ॥ तद्विक्षेपै: स्थिति
दलं विमर्दार्धं तथासकृत संसाध्यमन्य
था पाते तल्लिप्तादि फलं स्वकं ॥ सूर्य
चन्द्रपातानां गतय: स्थित्यर्धघटीभि: गु
णिता: षष्ट्याभक्ता लब्धं कलादि प्रग्रहे स्प
ष्टे स्थित्यर्धनिमित्ते सूर्यचन्द्रयो: शोध्यं
मोक्षे मोक्षस्थित्यर्धे देयमित्यर्थ: प
श्चात्कालिकसूर्यचन्द्रयोर्यान्य स्फुटा।

सूर्य
५
८५

85

तद्विक्षेपैः तात्कालिकचंद्रपाताभोगमाने
नशरकलाभिः पुनः पुनः स्थितेर्दलेवं
यं अस्यैकेस्पर्शस्थित्यर्थमेसाध्यो द्वितीय
मोक्षस्थित्यर्थं निमित्तेशोभयमसकृद्वा
रेवारेम्मसाध्यो यावत्स्थिरो भवति तथा स्प
र्शस्थित्यर्थमाथनशिनासकृद्यावत्स्थि-
रो भवति तावत्स्पर्शमदीर्थमोक्षमदेव
साध्ये एवंस्फुटेस्थितेस्तः ॥५॥ उदा
हरणम ॥ रविः ८।००।११।४१।०३ ग
तिः ५९।८ स्थित्यर्थघटी ४।४१ भिःगु
णिता २८।५९।८ षष्ठ्याभक्तालब्धकला
दिफले ४।४९ इदंस्पर्शयोद्विहीनेनात्का
लिकार्कः ८।००।१०।५२।१ एवंचंद्रः ११
२९।५९।२२।४ राहुः ८।०।४२।५८ पा
तोनचंद्रः ५।२८।२५।२५ अस्यभुजज्यं
५४।२४ चंद्रशरेण २७० गुणिता २५
४८८।० त्रिज्यया भक्तो लब्धशरः ७।१४
अस्यवर्गेन ५४।४५ विस्थ्योगार्द्धव
र्गः ३५८९।११ रहितेः ३५२७।२९ अ
स्यमूले ५९।२३ षष्टिगुणिते ३५५३
सूर्यचंद्रयोगत्यन्तरेण ७९५।५८ भक्ते
लब्धे स्पर्शादिके स्थित्यर्थं ४।३१ जातः
प्रथमपरिवर्तेः स्पर्शभवटीभिः ४।३१
चालितः चंद्रः ११।२९।११।०।१।११ राहुः

८।०।४३।५८ पातोनवेन्द्रः ५।१८।१९।३ अस्याभुजज्या ४३।५० शराः ०।११ अस्यावर्गेन ५४।२९ योगार्धवर्गः २५८।११ हीनः २५।२० असामूले ५५।२२ षष्टिगुणेने २५८२ गत्यन्तरेणभक्ते लब्धिकालिक स्थित्यर्धं ४।२५ ज्ञातो द्वितीयपरिवर्तः एवमसकृत्कर्मेण साधितेस्पर्शस्थित्यर्धे ४।२५ स्पष्टे ॥ अथ मोक्षस्थित्यर्धं साधयति ॥ आभिः घटीभिः चालितः वेन्द्रः २।१।१८।४।१ राहुः ८।०।४३।३० पातोनवेन्द्रः ५।०।२५।१० अस्याभुजज्या २५।१० शरेणगुणिता २४५५।१० । त्रिज्याभक्ते लब्धः शरः ०।४५ अस्यावर्गेन ०२२ योगार्धवर्गः २५८।१०।१ हीनः २५७४।१८ असामूले ५५।४० षष्टिगुणितेन २५८०।१० गत्यन्तरेणभक्ते लब्धं मोक्षस्थित्यर्धघटिकात्मकं ४।४० एवं ज्ञातः प्रथमपरिवर्तः आभिः घटीभिः ४।४० चालितः वेन्द्रः २।१।१८।२९ राहुः ८।०।४३।३० पातोनवेन्द्रः ५।०।२४।५९ अस्याभुजज्या २४।५९ शराः ०।४४ अस्यावर्गेन ०।१८ योगार्धवर्गः २५८।१।१। हीनः २५७४।२२ असामूले ५५।४० षष्टिगुणे २५८०।१० गत्यन्तरेणभक्ते ल।

त्रेमोक्षस्थित्यर्धघटिकात्मके ४।४० ॥
एवं जातः द्वितीयपरिवर्तः एवमसकृ
त्कर्मणा साधिते मोक्षस्थित्यर्धं स्पष्टं ४
४० ॥ अथ स्पर्शमर्दसाधनं ॥ मर्दघ
टी २।२ आभिः घटीभिः चालितः चन्द्रः
१।२२।४५।५२। राहुः ०।११।८।४३।५
पातोनचन्द्रः ५।१४।१।११ अस्माद्भुजज्या
५७।५८ परमक्षेपेण २७० गुणिता १
५९५।१० त्रिज्यया ३४३८ भक्ते लब्धं
शरः ४।३२ अस्य वर्गेण २०।४२। बि
म्बमानान्तरार्धवर्गः ९३९४ हीनः ९
३५।२२ अस्य मूलं ९५।५१ षष्टिगुणि
ते १५५१० गत्यन्तरेण ७९५।५८
भक्ते लब्धं स्पर्शमर्दार्धं २।२। जातः प्र
थमपरिवर्तः आभिः घटीभिः चालितः
चन्द्रः १।२९।५९।१९ राहुः ०।१०।४२
५ पातोनचन्द्रः ५।१९।२।१९ अस्य
भुजज्या ५७।४४ शरः ४।३२ अस्य
वर्गेण २०।२२ मानान्तरार्धवर्गः ९३
९।४ हीनः ९७५।३२ अस्य मूलं ३५
५९ षष्टिगुणितं १५५९।० गत्यन्तरेण
भक्ते लब्धं स्पर्शमर्दनं २०२ एवमसकृ
त्कर्मणा साधितं स्पर्शमर्दार्धं स्पष्टं २।२
अथ मोक्षमर्दार्धसाधनं ॥ मर्दघटी २।

६। आभिः चालितः केन्द्रः ३।०।४२।२२।
राहुः ८।०।४२।१८ पातोनकेन्द्रः ५।२१
५८।४४ ग्रस्तभुजज्या ११।१९ स्फुटः ०।१५
ग्रस्तवर्गेण १०३३ मानैक्यार्धं ३।४ जा
तः प्रथमपरिवर्तः आभिः चालितः के
न्द्रः ३।०।४३।२९। राहुः ८।०।४३।२
८ पातोनकेन्द्रः ५।२१।५८।५८ ग्रस्तभु
जज्या ११।२। स्फुटः ०।४ ग्रस्तवर्गेण।
०० मानैक्यार्धवर्गः ९९९.४ हीनः
९९९९ ग्रस्तमूले ३९।३३ षष्टिगुणे १५
८३।० गत्यन्तरेण भक्ते लब्धे मोक्षमर्दार्धं
३।४ एवमसकृत्कर्मणा साधिते मोक्षम
र्दार्धं स्पष्टे ३।४ ॥ अथ मध्यग्रहणस
र्पमोक्षपातानाह ॥ स्फुटतिथ्यावसाने
नु मध्यग्रहणमादिशेत् । स्थित्यर्धनाडि।
काहीनो ग्रासो मोक्षस्तु संयुतः ॥ स्फुट
तिथ्यावसाने स्फुटतिथ्यन्तकाले मध्य
ग्रहणमादिशेत् कथयेत् स्थित्यर्धना
डिकाहीने स्पर्शः स्थित्यर्धघटिकाभिर्युते।
तिथ्यन्तकाले मध्यग्रासः स्पर्शः मोक्षः
स्थित्यर्धघटीभिः युते तिथ्यन्ते मोक्षः ॥
उदाहरणं ॥ तिथ्यन्तघटी ४२।० अयमेव
तिथ्यन्तकालः अस्मिन्समये मध्यग्रहणे
यः आगतो ग्रासः तत्समये यन्मध्य।

ग्रहणे समयग्रहणकालः ४२।८स्पर्श
स्थित्या ४।३५ रहितो जातः स्पर्शकालः
३७।३८ मोक्षस्थित्या ४।।४० युतो जातो
मोक्षकालः ४२।१८ ॥ अथ पूर्णग्रा
हणे निमीलनोन्मीलनकालमाह ॥ ॥
तद्दलविमर्दार्धनाडिकाहीनयुते नि
मीलनोन्मीलनाख्यौ भवेतां सकलग्रहे ॥
सपूर्णग्रहणे न्यून स्पर्शमोक्षकाले।
यो न्यासस्पर्शविमर्दखण्डाभ्यां क्रमेण हीनयुते
तिथ्यन्तकाले निमीलनोन्मीलने स्यातां ॥
उदाहरणं ॥ तिथ्यन्तकालः ४२।८स्प
र्शविमर्देन २।२। रहितः जातः संमीलनका
लः ४०५ मोक्षविमर्देन २।४ सहितः जा
तः उन्मीलनकालः ४४।११ स्पर्शग्रासा
रम्भः मोक्षग्रासमाप्त्यारम्भः संमील
ने सर्वबिम्बग्रासे विग्राससउन्मीलने बिम्ब
न्मुक्ते प्रारम्भकाल इत्यर्थः ॥ अथे
ष्टकाले इष्टग्रासज्ञानार्थं कोटिवलान
यनमाह ॥ इष्टनाडीविहीनेन स्थित्य
र्धेनार्केन्दुयोः भुजेन संमाहत्नात्वध्या
माः कोटिलिप्तिकाः ॥ भुजेन संस्पर्शयो
र्योः गतिं न दुः इष्टनाडीविहीनेन स्थित्यर्धे
न हन्या हतायेन नष्टया स्पर्शस्थित्य।
र्धेनन्यूनौ इष्टकोटिका कल्पनीयः नाभि

87

त्रिभुजदोर्भिः रहिते स्पर्शाख्येत्यर्थे यद्दक्षि
ष्टेनेन गुणयेदित्यर्थः अस्मात्षष्ट्याप्ते को।
टिकला भवेत् ॥ उदाहरणं ॥ स्प
र्शकालीनेस्पष्टाख्येत्यर्थे ५।३४ उष्णा
शोभोः ३।३५ रहिते २।० अनेन सूर्यचन्द्र
योः गत्यन्तरे ७८५।१।५८ गुणिते १५२१
१५९ षष्ट्याप्ते लब्धं कोटिलिप्ता २५
२२ ॥ अथ सूर्यग्रहणे विशेषमाह ॥
भानोः ग्रहे कोटिलिप्ता मध्याख्येत्यर्थे म।
हूनाः स्फुटाख्येत्यर्थे सभक्ता स्पष्टा कोटि
कलाः स्मृताः ॥ भानोः ग्रहे सूर्यग्र
हणे पूर्वोक्तप्रकारेण साधितायाः को
टिकलाः तामध्याख्येत्यर्थेन संगुणिताः
सूर्यग्रहणाधिकारोक्तेन स्फुटाख्येत्यर्थे
न भक्ताः स्पष्टाः कोटिकलाः उक्ताः ॥१६ ॥
अथाभीष्टग्रासानयनमाह ॥ छेद्यो
र्वर्गैक्ययोर्मूलयुतेस्फले अवलितत् मान
योगार्धतः शोध्यग्रासस्तान्कालिको भवे।
त् ॥ छेद्यः स्पार्शावकः स्पष्टभुजस्ते
कः कोटिस्पर्शानीतानयोः कोटिभुजयो
र्वर्गैक्ययोर्मूलकर्णः तत्कर्णोन्मितेस्फु
टेमानयोगार्धतः मानैक्यखण्डाद्वि।
शोध्य शोषिता कालिकः कालेन इष्ट।
कालिको ग्रासः स्यात् ॥ उदाहरणं।

सूसि
उ.
९८

88

कलितमिष्टं २।३४ अनेनवेद्धभुक्ति ८।२।
९ गुणिता २।४।४८ षष्ट्याभक्तेलब्धेका।
लादिफले ३७।३२ अनेनस्पष्टकालिक:
वेद्धः १।२४।१०।७। गुणकोजातःश्च्छ्का
लिकःवेद्धः १।२४।३४।३२। एवंपाद्धः
८।०।४३।५०। पातेनवेद्धः ५।२९।२
४२। अस्यभुजज्या ५७।५८ शरः ५।३९
अयमेवभुजः अस्यवर्गः ३०।३५ कोटि
रिज्या २५।३३। वर्गः ६५।१।५७ वर्गयो
गः ९५९।१२। अस्यमूलेजातःकर्णः
२५।५५। अयमानेयोगार्धतः ५।४५
१ शोधितःजातःस्पष्टःनाक्षकालिकाय
मष्टःमेलकः ३२।५९ ॥ अथमध्य
ग्रहणान्तेनामिष्टग्रासानयनमाह ॥ म
ध्यग्रहणान्तर्गतमिष्टनाड्योविशोधयेत
स्थित्यर्धान्मोक्षिकाच्छेषेग्रासवच्छेषमा
दिवं ॥ मध्यग्रहणकालात ऊर्ध्वम
नंतरमिष्टंचदेकामोक्षिकान्मोक्षका
लमेभ्येधान्तस्थित्यर्धाच्छ्रोदयेत शेषंको
टिलिप्तादिग्रासमानयनोक्तप्रकारवत ग्रासो
न्मोक्षिकमोक्षस्थित्यर्धातर्गतेष्टकालेशे
षुर्ववेत्स्याक्तग्रासोभवति ॥ उदाहर
ण ॥ मोक्षकालेनस्पष्टस्थित्यर्धे ४४।
४२ इष्टनाडीभिः २।३४ राहितं २।१।

अनेन सूर्यवेद्ययोगान्तेन रवे १५८।५८ गु
णिते १५४४।४० षष्ट्याभक्ते लब्धे कोटि
कला: १५।४४। इष्टचरे २।३५ अ
नेन वेद्यगुणिते: ८।१।९ गुणिता ३।३५
१।४८ षष्ट्याभक्ते लब्धे कलादिफले २
९।२२ अनेन कालोनः वेद्यः २।०।१
४।१०।१ पुनः जातः इष्टकालिकः
वेद्यः २।०।१५।०३८ पातः ८।१०।४२
३८ पातोनवेद्यः ९।०।१०।१० अस्य
भुजज्या १०० शरः ०।२२ अयमेव
भुजः अस्य वर्गः ०।१ कोटिलिप्ता
१५।४४ वर्गः ९९२।१२ वर्गयोगः ९
९२।१९ अस्य मूलकर्णः १५।४४ अ
येमानयोगार्धेन ५९।५१ भाजितो
जातो मोक्षकालस्पर्शकालिकोऽयामः
स्पष्टमेव च: ३४।०१ स्पर्शे ग्रहे यदोक्तं
तन्मोक्षेऽपि मोक्षान्तमागेष्टमोक्षेऽपि
तेऽध्येयं ॥ ॥ अथाभीष्टग्रासादिष्टा
कालानयने श्लोकाभ्यामाह ॥ ग्रा
सप्राहकयोर्मानैः यो ध्या: सत्कृत्वाले
श्रिका: नष्टग्रासोनितकालविदेया
स्फुरतिः पदम् ॥ कोटिलिप्ताः रवे
स्पष्टस्थित्यर्धेन हृता हृता मध्येनाले
प्ता: तानाडयः स्थित्यन्तग्रासनाड्यः।

का: ॥ २३ ॥ क्रान्त्यग्रादकमानैक्यार्ध
एडन: अभीष्टग्रासकला: शेषा: शु
द्धस्पर्शकोटिभीष्टग्रासकालेकस्पर्शेण
विशेषाधशेषसम्मीलनकोटिकला: र
वे: सूर्यस्य ग्रहणे उक्तप्रकारेणया: क
ला: ता: स्पष्टस्थित्यर्धेन गुण्या: स्पष्ट
शरोनस्थित्यर्धेन मध्यमेन भक्ता: फ
लं कोटिकला भवंति स्थित्यर्धवत् स्थित्य
र्धसाधनरीत्या तासां कोटिकलानां घ
टिकाद्याला अभीष्टग्रासस्य संबंधिघटि
का: क्रमेण मध्यग्रहणात्पूर्वागताना वा भ
वंति ॥ २३ ॥ उदाहरणं ॥ मानैक्या
र्धं ५९।५१ स्पार्शिकग्रासलिप्ताभि:
३२।५८ हीनं २५।५५ जात: कला:।
अस्यावर्ग: ८२।४० स्पार्शिककोटि: ४।
३०। वर्गेनहीन: ८५२।२५ अस्यमूले
जात: कोटिलिप्ता: २५।३२ षष्ट्याघ्रा
णीता ८०।५।२० गत्यंतरेण भक्ता लब्धा
नाड्य: २।० आभि: रहिते स्पार्शिकस्थि
त्यर्धं स्पष्टं ४।३९ जातं स्पार्शिकस्पष्टं २
३९ अथ मौक्षिके ग्रासलिप्ताभि: ३
४।० मानैक्यार्धात् ५९।५१ हीने २५
५४। जातं कोटि: अस्यावर्ग: ६८८।१९
मौक्षिकशरवर्ग: ०।१२ वर्गांतरं ८८५

५८ भक्त्यालम्बेनाक्षाः २।१ आभिः रहिते
ज्ञाने स्पार्शिक मौद्रिक स्थित्यर्थं ४२।४८।
ज्ञाने मौद्रिक मिष्टं २।२५ ॥ अथ वल
नानयं श्लोकाभ्यामाह ॥ ननु स्याद्यन्यर्थं
भक्त्यादि न्यासान स्पकाशुके वलनोक्ताः
स्थिताः सौम्याः शुक्रीयाक्कलाभ्याः ॥ ८॥
त्रिज्यया गुणितान्याप्ताः क्रान्त्या ग्रादिकस्मेगु
नः भेदेन न्यावलनाम स्मनयुग्लभाजिताः
२५ ॥ स्पष्टाम मध्यमोद्वयाणां मध्यो यत्का
लिके वलने कान्तुमिष्टं न त्कालिके वेद्धयहः।
णे वेद्धस्मात्तद्यस्मात्तं यग्रहणे स्पष्टं यस्मात्साधं।
न स्यात्स्थास्माद्यात्स्पर्शकालान्तत्रोषचद्रिकाः।
दिनार्धान्तःपूर्वं दिनगानेवाद्रिकान दिनार्धोड
परिदिने शेषचाद्रिकाः नत्येवं स्पष्टयोर्मध्यादुप
रिगतार्धं पर्यन्ते स्पर्शेन न ते गतार्धोऽपरि दिना
र्धपर्यन्ते पृष्ठिमनन्ते इदेवद्रयग्रहणे स्पष्टं यग्र
हणे विपरीते नताद्दिनार्धं साधनेयथा ॥
अत्र भगवता स्पष्टं येन नत साधनार्थे वेद्धस्य
गुणने कर्पे साधाम्मिति नोक्तं अन्यत्र ज्ञेयम्
के भास्कलेन यान्त्यानां साधितेय स्पष्टं दृस्यादिना
र्धे न तस्मात्तनोः पाञ्चस्यं यथा गतार्धं त्रिलोमसा
यादि इति कारणान यत स्पष्टं यस्यागतार्धं।
न देववेद्धस्याद्दिनार्धं भवतीति मात्वा श्रीमत
र्येनोक्तमिति भाति अन्ययान्त्यानां साधे।

सूर्य

उ

५०

90

नेपत्रत्स्याष्ट्रिगुणे पुनः षड्गुणे नेष्टाभवति
नस्पर्शो वा मा थेनगुणेन हि मानान्तस्य लाघु
मायातेभ्यकारणात्स्वदेशेन याम्यलाम्बोभा
स्करोत्रोच्यते मायथा नच तेन वर्तितेन व
हिनार्थेन भक्तेन नतांशाः तेषां ज्यानतज्या
स्याः स्वदेशोदन्त्यायागुणितानाक्षिज्यायागुणि
ताक्षिज्याभक्ताल्लब्धस्य कार्मुकं पलः कल
नकेषाष्टिभक्तेः पूर्वापरकपालयोः पूर्वप
श्चिमनतयोः क्रमेणोत्तरदक्षिणाः वलनं
शाः अक्षसंज्ञकाः भवति अन्यच्च स
र्शमध्यमोक्षत्रयाणां मध्ययकालिकेव
लनेन तात्कालिकात् ग्रहाद्याद्भगह्रणेव
ह्रास्त्र्यं ग्रहणेस्वयाङ्गभागत्रयपुताञ्च्याध्वं
शात येक्रान्तयंशास्तैः पूर्वानीतवलनांशैः
द्विकमैक्ये कृतेष्णगुणात्स्याज्याभेदेभिन्न
दिक्के अन्तरास्ताञ्चांशाः वलनांशाः अन्तरा
नज्याप्रमत्रगुलैः भक्ता षष्टांदिकाङ्गुला
त्मकावलना आयनसंज्ञकास्त्रभवति ॥
उदाहरणं ॥ पर्वान्तकालाः ५२।२ सूर्य
स्पर्शनप्रमाणेन २९।५ रहितः जातः सू
र्योस्ताद्गतेगतघटिकाः २९।११ सूर्यस्प्या
र्धे २९।५२।२९ इष्टमेवच इष्टस्पार्शिनार्धे २
९।५२ गतगतघटी २९।११ रहितेजा
तेष्टवनतेघटिकात्मके ०।५५ इष्टोल्क

५० स्फुटे ४।० चेद्गमादिनार्येन १६।५७ भक्के
लब्धंदिनांशाः ४१५७।२० पलांशा २५।३०
पलाभक्तांशा २५।३६।०१ ज्यया १६८४।१८
गुणिता ४४०८८६१३६ त्रिज्यया ३४।३८
भक्तालब्धं ११८।११४ ग्रसायनः १८।११४ बा
हुभक्तेलब्धं अस्तबलनांशाः पूर्वेननत्वात्
उत्तरा २।११८।११४ चेद्ग्रहणस्पर्शविमान
नानग्रासस्थिरमध्यकालीना २।००।१४।
०३ राशित्रययुतः ५।००।१४।०३ अयनां
शैः ५०।५३।२०।३।३७ युक्तः ससंभुजज्या
३।५।४० परमक्रान्तिज्या १६।५३ गुणिता
१०३५२२४।२० त्रिज्ययाभक्तेलब्धंक्रान्ति
ज्या ३।१४।४४ असायनः जानाक्रान्तिक।
लाः ३।११।२३ बहुभक्तेशायाक्रान्तिरुत्त
रा ५।११।२३ वलनक्रान्त्योरेकदिक्कायोग
उत्तरा ३।२५।४१ पलांशज्या ४३८।४८ स
मस्पगुले ३० भक्ताज्ञाना मध्यकालीनाय
नवलनांगुलादिकोत्तरा ६।१६ ॥ अथ स्प।
र्शकालेवलनसाधनम् ॥ तत्रसूर्योस्त
स्पर्शकाल ११।१२ चेद्धायनांशै १६।५७ लब्धा
काहृतं ५०२।३२ स्तोदयेन १६५७ भक्तेल
ब्धेननतांशा २५।१३८।४५ पलांशज्या १६२५
०५ भुजज्यया १४८४२८ गुणिता २४२८
३२५।४४ त्रिज्यया ३४३८ भक्तालब्धं ३०६

सूमि
३.
५२

91

२९ ग्रस्यपत्नुः ७।११।११।७ छन्नाभकेलत्रेवा
लनोष्णाः पूर्वनतनाडूनतः ११।५१।२७ स्पर्श
कालीनस्वष्टः १।२५।१०।१ मायनराशित्रय
युतः १५।११५।५५।३१ ग्रस्यभुजज्या ८३२
४ परमक्रांतिज्यया १३५७ गुणिता ८१६
१३५७१८ त्रिज्यया भकेलत्रेक्रांतिज्या ३३८।६
ग्रस्याधनुर्नीता क्रांतिकलाः ३३।८।३६ छ
न्नाभकेषायाक्रांतिनतः ५।३८।३६ ग्रस्या
नक्रांत्योरेकदिक्त्वाद्योगात्स्पष्टाः २७।३५।५२
पलांश्याः १०।३३।१५ समनरगुलैः ७० भक्ता
नाना स्पर्शकालीनायनवलनांगुलिकोन्नता
४।४५ ग्रस्यमोक्तकालीनवलनसाधनम् ॥
सूर्यास्तान्मोक्तकालः २०।४२ दिनार्धं ३२।१५
७ पश्चिमनते २।४४ विकालहते ३६५०० वे
द्यसंदिनार्धेन १६।५७ भकेलत्रेनतांशाः १९
४९।२२ पलांश्या १६।५।४ सूतांशज्यया १४
८४।२८ गुणिता १२३९५।५९५९।१७ त्रि
ज्यया ३४३८ भक्ता लब्धं ५०३२ ग्रस्यपत्नुः।
५०४।४४ भकेलत्रेवलनोष्णाः पश्चिमन
तनाडूनतः दक्षिणा ८।१४।४४ मोक्तका
लीनस्वष्टः ३।११।१८।२६ राशित्रययुतः ५।१
१८।२६ सायनः ५।१८।७।५६ ग्रस्यभुजज्या
७०७४ परमक्रांतिज्यया १३९७ गुणिता
५८७७२।१८ त्रिज्यया ३४३८ भकेलत्रेक्रांति

स्या २८।७।१८ ग्रासोऽथ नतुर्भोनाङ्गोऽत्मिकला २८
७३।५ षष्ट्याभक्ते यायाङ्कानि स्वतुरा ५५।७।३
४ वलनङ्कानामेभिर्ग्रदिग्नादेन दद्यत्रिणि ३
३।७।१० पाचास्या २२।७।१० समस्तयुले ३०
भक्तेजातानामेतत्कालीनावलनाङ्गुलात्मिकं
दत्तिणा ३।१६ अथ कलात्मकग्रासबिम्बादीनां
